PURANETIHASA

ACHARYA 2nd YEAR
Course/Paper.7

# PART - B

# स्कन्दपुराणम् (उत्कलखण्डे १-२२ अध्यायाः)

***Skandapurāṇam (Utkalakhaṇḍē 1-22 adhyāyāḥ)***


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमोऽध्यायः

## प्रस्तावना –

अष्टादशमहापुराणेषु स्कन्धमहापुराणस्यास्य महत् वैशिष्ट्यं वर्तते। सर्वबृहत् महापुराणरूपेण ख्यातिः च सर्वत्र प्रचकास्ति। पुराणेऽस्मिन् सर्वेषां तीर्थानां वर्णनं तथा क्षेत्राणां वर्णनं समुचितरूपेण समुपलभ्यते। प्रतिपाद्येऽस्मिन् विषये स्कन्धपुराणस्य श्रीविष्णुखण्डस्य विषयाः प्रस्तूयन्ते। अस्मिन् खण्डे पुरुषोत्तम-माहात्म्यविषयकं विवरणं सर्वं प्रतिपादितम्। समेषां तीर्थानां समन्वयः तथा मुक्तिस्वरूपद्वाररूपेण इदं पुरुषोत्तमक्षेत्रं सर्वत्र गीयते। अस्य महापुराणस्य वर्णनं यद्यपि तमोगुणात्मकं विद्यते तथापि विष्णोः माहात्म्यम् अस्मिन् अध्याये सम्यकतया प्रतिपादितो विद्यते।

## उद्देश्यम्

अस्मिन् अध्याये सर्वे पाठकाः एतान् सर्वान् अधोलिखितान् अंशान् पठिष्यन्ति।

- **श्रीपुरुषोत्तमक्षेत्रविषयकपरिप्रश्नाः तदुत्तरञ्च**
- **काकमुक्तिविवरणम्**
- **यमस्य भगवत्स्तुतिः**
- **मार्कण्डेयमुनिसंवादः**
- **मार्कण्डेयखातस्य महिमा**

## श्रीपुरुषोत्तमक्षेत्रविषयकपरिप्रश्ना: तदुत्तरञ्च

कदाचित् प्रशान्तमनसा मुनय: सर्वे जैमिनिमहर्षिं प्रति सम्बोधयामास - हे भगवन् ! भवान् सर्वशास्त्रज्ञ: सर्वतीर्थमहत्त्ववित् च वर्तते। पूर्वे प्रस्तुते प्रसङ्गे तीर्थकीर्त्तने पुरुषोत्तमाख्यं परमपावनं श्रीक्षेत्रं भवद्भि: समुपवर्णितम्। यत्र मानुषलीलया भगवान् दारुरूपेण अवतीर्ण: बभूव। सर्वतीर्थफलप्रदस्य श्रीपुरुषोत्तमाख्यपरमपावनक्षेत्रस्य वर्णनं विस्तारेण ब्रुहि। ज्योति: प्रकाशो भगवान् साक्षान्नारायण: दारुमय: परमपुरुष: कथं तस्मिन् स्थाने आस्ते ?

तस्य क्षेत्रस्य महिमा कौतुहलेन श्रोतुमिच्छामहे। तत: जैमिनिमहर्षि: उवाच - एतस्य विवरणं पूर्वकाले कार्त्तिकेय: भगवत: शङ्करस्य मुखारविन्दात् श्रुत्वा मन्दरपर्वते स्थितान् सिद्धगणान् प्राह:। तत्र मया यत् श्रुतं तत् श्रुणुध्वमिति। अवैष्णवानामपि श्रवणे तेषां मनसि भक्ते: सञ्चारो जायते। अस्य सङ्कीर्त्तनादेव सकलं तम: लीयते। यद्यपि अन्यानि बहूनि क्षेत्राणि विराजन्ते तथापि भगवत: वपु:स्वरूपमिदं स्थानं प्रचकास्ति। दशयोजनं विस्तृतमिदं क्षेत्रं सलीलादुत्थितं वालुकाचितञ्च वर्तते। ये अस्मिन् स्थाने स्थातुमिच्छन्ति ते परमपुण्यफलेन सह समस्तपापेषु विरता: भवन्ति। बृहन्नीलपर्वतेन इदं क्षेत्रं परिशोभितं वर्तते।

कदाचित् ब्रह्मा अस्मिन् चराचरे जगति तीर्थानि यथास्थानं सन्निवेश्य आध्यात्मिकादितापत्रयाभिभूता: जन्तव: कथं मुच्यन्ते, कथं सृष्टिभारो निपीडित: भविष्यतीति चिन्तयामास। तत: मुक्ते: कारणं साक्षात् भगवान् विष्णुरेव इति प्रत्यपादयत्। तत: ब्रह्मा जगदीश्वरं भिन्नभिन्नस्तुतिभि: प्रार्थयामास। समुद्रस्य उत्तरतीरं तथा महानद्या: दक्षिणतीरमध्यवर्त्तीस्थानम् अत्यन्तं दुर्लभं वर्तते। अस्मिन् स्थाने ये जना: निवसन्ति ते अतीव पुण्यभाज: भवन्ति। येषां जनानां पुण्यमल्पं वर्तते, ते जना: अस्मिन् स्थाने स्थातुं न शक्नुवन्ति। एकाम्रकाननात् दक्षिणसमुद्रतीरभूमिं यावत् सर्वमुत्तोरत्तरं पवित्रं वर्तते। सिन्धुतीरे यस्मिन् स्थाने नीलपर्वत: विराजते, तत् स्थानं सर्वेषां देवानां कृते अपि दुर्ज्ञेयं भवति। तत् स्थानमतीव गोपनीयं वर्तते, तथा मायया आच्छादितं विद्यते च। साक्षात् तस्मिन् स्थाने सर्वं परित्यज्य भगवान् अपि देहं स्वीकृत्य तिष्ठति। पुन: तत् स्थानं सृष्टिप्रलययो: बहिर्भुतं विद्यते। देवलोके भगवत: यद्रूपं सर्वे चक्राद्याभूषणै: परिपश्यन्ति, तद्रूपमपि पुरुषोत्तमे क्षेत्रे सर्वे द्रष्टुं शक्नुवन्ति। वायव्यां दिशि अक्षयवटमूले यत् रोहिणाख्यं कुण्डं विश्रुतं, तत्र तदम्भसा स्नात्वा जीवा: क्षीणपापा: सन्त: भगवत: सायुज्यमुक्तिं प्रति व्रजन्ति। प्रशान्तचित्त: सन् तस्मिन् स्थाने य: दिवारात्रमेकं तिष्ठति स: तस्य

जन्मान्तरं पापं प्रमुच्य स्वर्गफलं प्राप्नोति। यदि कश्चित् निमेषमात्रं तिष्ठति सः अश्वमेधयज्ञस्य फलं प्राप्नोति। साक्षात् भगवान् अस्य क्षेत्रस्य महत्त्वं ब्रह्माणं प्रति प्रोवाच। अस्य क्षेत्रस्य विषये बहूषु पुराणेषु नैकेषु ग्रन्थेषु च वर्ण्यते, पुरुषोत्तमक्षेत्रं तादृशं स्थानं विद्यते, यत् देवानां कृते अपि अप्राप्यं वर्तते।

**बोधप्रश्नः**

१. पुरुषोत्तमक्षेत्रे स्थितस्य कुण्डस्य नाम किम्?

२. कः अश्वमेधयज्ञस्य फलं प्राप्नोति?

३. कः सर्वान् मुनीन् पुरुषोत्तममाहात्म्यं कथयामास?

## काकमुक्तिविवरणम्

स्वयं ब्रह्मा अपि पूर्वकाले भगवतः यद्रूपम् अद्राक्षीत्,तत् पुरुषोत्तमे क्षेत्रे अपि अपश्यत्। ब्रह्मा भगवतः प्रत्यभिज्ञानं कृत्वा दृष्टिचित्तः सन् अद्भुतज्ञानम् अलभत। ततःपरं भगवतः विविधरूपेण स्तुतिमकार्षीत्। भगवतः स्तवनसमये कुतश्चित् एकः पिपासितः वायसः समागत्य तस्मिन् रोहिणकुण्डे निमज्ज्य भगवन्तं माधवं विलोक्य पाददेशे अतिष्ठत्। भगवान् ब्रह्मा अपि अस्य वायसस्य दीनावस्थां विलोक्य कदाचित् सृष्टेः लयः समायातः इति चिन्तयामास। वेदान्ते मुक्तितत्त्वे कदाचित् सन्देहः विद्यते परन्तु पुरुषोत्तमक्षेत्रे तथा सन्देहः न विद्यते। यस्य भगवतः नामस्मरणेन विविधानां पापानां नाशं भवति यस्य नामकीर्त्तनेन संसारगतदुःखानां कदाचिदपि स्पर्शोऽपि न भवति, पुनः दर्शनमात्रेणैव मोक्षाख्यफलमचिराद् लभ्यते तस्य भगवतः ध्यानं सदा योगिनः पुरुषोत्तमे क्षेत्रे आचरन्ति। अस्मिन् क्षेत्रे वायसः अपि भक्तिपूतः सन् भगवतः सान्निध्यं प्राप्तवान्, साक्षात् भगवान् चक्राद्यायूधेन तस्मै दर्शनं ददौ। ये जनाः सदासर्वदा शान्तवैराग्यज्ञानयुक्ताः तेषां जनानां मुक्तिविषये को वा सन्देहः विद्यते? मनसि भिन्नं विचिन्त्य वायसः पिपासितो भूत्वा अस्मिन् स्थाने भगवतः सान्निध्यं लब्ध्वा मुाक्तिं पपौ, तर्हि ये ज्ञाननयुक्ताः विदूषामत्र कीदृशं फलं भविष्यति इति शङ्कनीयम्। अस्य पुरुषोत्तमक्षेत्रस्य महिमा तथा विद्यते। कल्पान्ते अपि अस्य क्षेत्रस्य लयः कदाचिदपि न भवति। अस्मिन् स्थाने ये जनाः तिष्ठन्ति, भक्तिपूतरूपेण

भगवत: स्तुतिमाचरन्ति ते अवश्यं पुण्यभाज: भविष्यन्ति। भगवत: सकलेशस्य प्रियस्थानरूपेण अस्य स्थानस्य कीर्त्ति: सुतरां वरिवर्त्तते।

**बोधप्रश्न:**

१. क: पुरुषोत्तमे क्षेत्रे मुक्तिं प्राप्तवान्?

२. भगवत: सकलेशस्य प्रियस्थानं किम्?

## यमस्य भगवत्स्तुति:

साक्षात् ब्रह्मा एतादृशं काकमुक्तिविवरणं श्रुत्वा तस्मिन् स्थाने भगवत: आराधनं चकार। स्वस्य अधिकारस्य भग्नकारणवशत: तस्मिन् पुरुषोत्तमक्षेत्रे कदाचित् यम: दु:खसंविग्नमनसा प्राविवेश:। विधिवत् भगवत: दर्शनं कृत्वा प्रणिपातपुर:सरं स्वाधिकारदृढ़ीकर्त्तुं तं जगन्नाथं तुष्टाव।

यम: असकृत् भगवत: आराधनं तस्मिन् पुरुषोत्तमे क्षेत्रे चकार। यम: अब्रवीत् हे भगवन्! सूत्रे मणय: यथा गुम्फिता: भवन्ति, तथैव भवान् साक्षात् अस्मिन् जगति ओतप्रोत: विद्यते एव। अस्य सृष्टिस्थितप्रलयस्य कारणभूत: भवान् एव। चन्द्रसूर्यरूपेण नित्यं जगत् भासयते। भवान् विश्वेश्वर: जगद्योनि: विश्वावास: जगद्गुरुश्च वर्त्तते। समेषां दैत्यानां विनाशनिमित्तं विविधरूपं धृत्वा अस्य संसारस्य उद्धारं कृतवान्। निर्मलपद्मकञ्जल्कपीतवस्त्रं परिधृत्वा दीनानामुद्धरणं चकार। यस्य चक्रेण सर्वे विलीयन्ते तं पुरुषोत्तमं जगन्नाथं यम: असकृत् स्मृत्वा अध्यायत्। पुन: चन्द्रसूर्याग्निचक्षुषे यज्ञवराहाय नृसिंहाय महाद्रष्टमूर्त्तिद्रावितशत्रवे पुरुषोत्तमाय जगन्नाथाय यम: नमस्कुरुते। कमलाया: अपाङ्गसंसर्गेण यस्य नयनं सुशोभितं वर्त्तते यस्य पादपद्मम् आश्रित्य लक्ष्मी विराजते, यस्य सृष्टौ प्रवृत्ता: सन्त: सर्वे प्रकृत्यादय: विमोहिता: भवन्ति, ब्रह्मण: विकारे य: कारणभूत: स: साक्षात् नारायण: परमपुरुष: परात्पर: अखिलसंसारस्य कारणभूतो वर्त्तते। एवं रूपेण धर्मराजस्य यमस्य प्रार्थनां श्रुत्वा भगवान् परितोषितो भूत्वा पार्श्वस्थां वल्लकीहस्तां लक्ष्मीं कटाक्षेण अलक्षत्। तत: लक्ष्मी: यमं प्रति अभ्यर्थयामास। येन कारणेन यम: समायात: तथा तुष्टये अभिरतो विद्यते तत् अत्यन्तदुर्लभो विद्यते। पुरुषोत्तमक्षेत्रस्य महिमा तथा वर्त्तते, येन कारणेन अस्मिन् क्षेत्रे सर्वे कदाचिदपि न लीयन्ते। कदाचित् कल्पावसाने

अपि अस्य स्थानस्य महिमा तथैव भविष्यति। शुभाशुभकर्मण: फलं कदाचिदपि अस्य क्षेत्रस्य महत्त्वं न हनिष्यति। अस्मिन् स्थाने ये प्राणिन: प्रविशन्ति तेषां समेषां पापानि दग्धीभविष्यति। सर्वे जना: अस्मिन् स्थाने भगवत: सान्निध्यं लब्ध्वा स्वस्य कर्मवन्धनात् प्रमुच्यन्ते।

**बोधप्रश्न:**

१. भगवत: वामाङ्गी का विद्यते ?

२. क: भगवन्तं तुष्टाव ?

## मार्कण्डेयमुनिसंवाद:

भगवत: पादयुगलयो: आश्रयं स्वीकृत्य लक्ष्मी: सदासर्वदा चिन्तने तथा भगवत: आदेशानुसारं कार्यं करोति। भगवत: आदेशानुसारं यममभिवाद्य प्रहृष्टमनसा श्री: मार्कण्डेयमुने: सम्वादम् अभाषत। यदा चराचरमिदं जगत् प्रलये विलीन: आसीत् तदानीं पुरुषोत्तमक्षेत्रं तथा भगवती लक्ष्मी: उभौ आस्ताताम्। तदानीं सप्तकल्पायु: मृकण्डो: अपत्यं मार्कण्डेयमुनि: प्रलयकाले कुत्रचित् अवस्थानं न अवाप। प्रलयकाले जलार्णवे इतस्तत: विभ्रम्य स: पुरुषोत्तमक्षेत्रं प्रति समायात: अभूत्। स: आदौ एकं वटवृक्षं ददर्श। वृक्षोद्देश्येन सन्तरत: सन् मार्कण्डेयमुनि: कस्यचित् एकस्य बालकस्य वचनं श्रुतवान्। स: प्रोवाच यत् इदं पुरुषोत्तमक्षेत्रं कदाचिदपि जलार्णवे शीर्णो न भवति अग्नौ दह्यते तथा सम्वर्त्तकादिभि: न शोष्यते विचाल्यते च। अयं महान् न्यग्रोध: जलार्णवे यूपसदृश: सदा तिष्ठते। तदानीं मुनि: मार्कण्डेय: तस्य न्रग्रोधवृक्षस्य अध: उषित्वा चिन्तयामास यत् जलार्णवे सर्वे स्थावरजङ्गमादय: विलीना: जाता: परन्तुं कथमयं वृक्ष: अतिष्ठत्? तत: मार्कण्डेय: प्रलयावहे जले निमग्नेन भगवत: चिन्तनं कृत्वा स्तवनमकार्षीत्। तत: भगवत: दर्शनं लब्ध्वा स: हृष्टान्तरात्मा साष्टाङ्गमानो भूत्वा भगवत: जगन्नाथस्य प्रसादनाय स्तोत्रमरात्। मार्कण्डेय: प्राह हे भगवन्! भवत: अभयचरणारविन्दं संप्राप्य ब्रह्मचन्द्रसूर्यरुद्रादीनां सम्पत्तुल्यं पदमहं प्राप्तवान्, परन्तु भगवत: आराधनं न कृत्वा प्रतप्तं दीनं भुञ्जे। अत: हे कृपानिधि मां पाहि। यथा सुवर्णं वलयाकररूपेण विविधरूपं प्राप्नोति तथैव भगवान् स्वमायया विविधरूपेण प्रतिभाति, परन्तु मूढ़ा: अस्मिन् विषये न किमपि ज्ञातुं शक्नुवन्ति। सज्जनानां रक्षणार्थं दुष्टानां दलनार्थं युगे युगे

भगवान् अवतरति। साक्षात् भगवान् बालकरूपेण तस्मिन् वृक्षे आरोहणपूर्वकं शेते। भगवत: वाक्यं श्रवणं कृत्वा बालकस्य मुखगह्वरे स: मुनिसत्तम: प्राविवेश। तस्मिन् आभ्यन्तरे स: मुनि: चतुर्द्दशभुवनमण्डलं, ब्रह्मादिग्पालान् देवगन्धर्वराक्षसान् ऋषीन् देवान् पितृन् पृथिवीं, पर्वतनगरकाननग्रामतीर्थपातालनागकन्याराजसदनानन्तदेवादीन् सर्वान् ददर्श। तस्य बालकस्य कुक्षौ इतस्तत: सर्वं भ्रममाण: सर्वं विस्मृतो भूत्वा अपश्यत्। विनिष्क्रम्य पुन: उत्फुल्लितनयन: सन् पुरुषोत्तमं भगवन्तम् असकृत् प्रणिपातं चकार। तत: पुन: अस्य पुरुषोत्तमक्षेत्रस्य महत्त्वं अवदत्। य: जन: अस्मिन् पुरुषोत्तमक्षेत्रे भगवत: नामस्मरणं कीर्त्तनं च करिष्यति स: कदाचिदपि पुन: मातृगर्भं प्रति न गमिष्यति। तस्य सकलानां पापानां विनाशं भवति। मृत्युं जित्वा स: विष्णुलोके महीयते। तस्य पुन: जन्मादि वन्धनं न भविष्यति। भगवत: अपारसान्निध्यं लब्ध्वा स: शोकमोहादिषु विरहित: सन् आनन्देन परमधाम्नि विचरति। कर्मवन्धानात् सदा स: प्रमुच्यते। कल्पान्ते अपि तस्य इतस्तत: भ्रमणं न कदापि स्यात्। विष्णो: अन्त: प्रविश्य स: संसारसागरात् मुक्तो भवति।

**बोधप्रश्न:**

१. मार्कण्डेयस्य पितु: नाम किम्?

२. पुरुषोत्तमक्षेत्रं प्रति क: अगच्छत्?

## मार्कण्डेयखातस्य महिमा

मार्कण्डेयमुनि: विविधरूपेण भगवत: आराधनां चकार। साक्षात् भगवान् मार्कण्डेयं दर्शनं दत्वा लक्ष्मीं प्रति निशम्य च मार्कण्डेयं भगवत: शिवस्य स्तुतिनिमित्तं प्रोवाच। कल्पान्तं पर्यन्तं तस्मिन् पुरुषोत्तमक्षेत्रे स्थातुम् उपादिदेश। तत: मार्कण्डेय: तस्मिन् पुरुषोत्तमक्षेत्रे उषित्वा सदा स्तुतिम् आरात्। भगवत: अनुग्रहरूपेण तस्मिन् स्थाने स्थित्वा मृत्युं जित्वा च अवसत्। प्रलयकालं यावत् भगवान् अपि तस्मिन् क्षेत्रे नित्यं न्यवसत्। तत: कल्पावसाने मार्कण्डेयनिमित्तमेकस्य तीर्थस्य रचनां चकार। भगवत: द्वितीयं तनुं शिवमाराध्य निश्चयं मृत्युं जेष्यति इति भगवान् प्रबोधयामास। तत: मार्कण्डेय: तीर्थमास्थाय भगवत: शिवस्य स्तुतिं चकार। तत: प्राप्तवर: स: मुनिसत्तम: न्यग्रोधवृक्षस्य वायव्यकोणे गर्त्तमास्थाय भगवन्तं शिवमाराधयामास। भगवत: सान्निध्यं

लब्ध्वा सः मार्कण्डेयः मृत्युं जितवान्। तस्मात् दिनात् सः गर्त्तः मार्कण्डेयखातरूपेण प्रसिद्धो बभूव। तस्मिन् मार्कण्डेयखाते स्नानं कृत्वा सर्वे भगवतः शिवस्य आराधनं कुर्वन्ति। यः तस्मिन् खाते प्रविश्य आराधनां कृत्वा भगवतः शिवस्य सान्निध्यं प्रप्नोति सः लोके अश्वमेधतुल्यं फलं भुङ्क्ते। अस्मिन् स्थाने यः तिष्ठति सोऽपि मृत्युं जेष्यति। सकलानां पापानां हरणं चात्र भवति।

**बोधप्रश्नः**

१. कुत्र सकलानां पापानां विनाशो भवति ?

२. स्कन्दपुराणे कस्मिन् खण्डे पुरुषोत्तममाहात्म्यं प्रतिपादितम् ?

## सारांशः

भगवान् जैमिनिः सर्वान् मुनीन् कदाचित् पुरुषोत्तमक्षेत्रस्य विषये प्रोवाच। ततः सर्वे मुनयः एतस्य पुरुषोत्तमक्षेत्रस्य विषये असकृत् प्रोचुः। तेषां मुनीनां प्रश्नेन जैमिनिभगवान् अस्य पुरुषोत्तमक्षेत्रस्य महत्त्वं प्राह। भगवतः नारायणस्य परमप्रियस्थानं भवति इदं पुरुषोत्तमक्षेत्रम्। अस्मिन् क्षेत्रे यः रमते तस्य कदाचिदपि पुनः जन्म न भवति। वायसस्य मुक्तिविवरणमस्य अध्यायस्य महत्त्वं वर्धयति। अस्मिन् पुरुषोत्तमक्षेत्रे वायसः पिपासितः अपि सन् भगवतः सान्निध्यं लब्ध्वा मुक्तिं पपौ। मार्कण्डेयमुनेः चरितम् अध्यायेऽस्मिन् प्रस्तुतो विद्यते। यस्य मार्कण्डेयस्य प्रलयकाले इतस्ततः भ्रमणं वर्णितं विद्यते। श्रीयः मार्कण्डेयं प्रति सम्बोधनमपि अध्यायेऽस्मिन् प्रतिपाद्यते। सकलानां जीवानां कीटपतङ्गादारभ्य बृहत् यावत् भगवतः कुक्षौ सर्वं समीहते इति मार्कण्डेयः ज्ञानं प्राप्तवान्। भगवतः प्रेरणया पुरुषोत्तमक्षेत्रे गर्त्तं प्रस्तूय भगवतः शिवस्य आराधनं चकार। पुनः अस्मिन् अध्याये मार्कण्डेयखातस्य महत्त्वं प्रतिपादितं विद्यते। यस्य खातस्य महत्त्वं साक्षात् भगवान् प्रोवाच।

# आदर्शप्रश्नाः

## लघुत्तरीयप्रश्नाः

१. मार्कण्डेयखातवर्णनम्।

२. पुरुषोत्तमक्षेत्रस्य महत्त्वम्।

३. पुरुषोत्तमक्षेत्रे अवस्थानस्य फलम्।

## विश्लेषणात्मकप्रश्नाः

१. वायसस्य पुरुषोत्तमेक्षेत्रे मुक्तेः रहस्यं प्रतिपादयत।

२. यमं प्रति लक्ष्म्याः सम्बोधनं विशदयत।

३. मार्कण्डेयस्य चरितं प्रतिपादयत।

## निवन्धात्मकप्रश्नाः

१. पुरुषोत्तमक्षेत्रस्य महत्त्वं प्रतिपाद्य सर्वतीर्थेषु स्वतन्त्रस्थानं परचाययत।

२. काकमुक्तिविवरणं लिखत।

३. यमस्य भगवत्स्तुतिं निरूपयत।

## एकाङ्कप्रश्नाः

१. स्कन्धपुराणं कीदृशं पुराणं वर्तते ?

२. पुरुषोत्तमक्षेत्रे खातस्य नाम किम् आसीत् ?

३. वायसः कुत्र गत्वा मुाक्तिं प्राप्तवान् ?

४. मर्कण्डोः पुत्रः कः ?

५. कः भगवतः स्तुतिमकरोत् ?

६. लक्ष्मीः भगवतः कुत्र निवसति ?

७. पुरुषोत्तमक्षेत्रं कस्य प्रियक्षेत्ररूपेण ख्यातं वर्तते ?

८. कल्पान्तं यावत् कः तिष्ठति ?

९. धर्मराजः कः ?

१०. मार्कण्डेयमुनेः आयुः कियत् आसीत्?

११. पुरुषोत्तमक्षेत्रे विद्यमानस्य वृक्षस्य नाम किम्?

१२. सर्वतीर्थेषु श्रेष्ठं किं वर्तते?

**उत्तराणि**

१. तामसिकं २. मार्कण्डेयखातं ३. पुरुषोत्तमक्षेत्रम् ४. मार्कण्डेयः ५. यमः ६. वामपार्श्वे

७. विष्णोः ८. वटवृक्षः ९. यमः १०. सप्तकल्पं ११. न्यग्रोधः १२. पुरुषोत्तमक्षेत्रम्

# द्वितीयोऽध्यायः

## प्रस्तावना

भगवतः लीलां देवाः अपि ज्ञातुं कदाचित् न शक्नुवन्ति। अतः एतस्य देवाधिदेवस्य जगत्पतेः विष्णोः नीलमाधवरूपेण मर्त्यमण्डले अवतारः मार्मीकतां प्रस्तौति। अस्य पुरुषोत्तमस्य क्षेत्रस्य विस्तृतं वर्णनं तथा विविधस्थलेषु विद्यमानानां तीर्थानां वर्णनं समुपलभ्यते। अस्य क्षेत्रस्य माहात्म्यं यद्यपि देवाः अपि निर्धारयितुं न शक्नुवन्ति, तथापि विविधानामुपाख्यानानां माध्यमेन सकलपापं विरहिताः सन्तः सर्वेऽपि स्वर्गलोकं यान्ति, तस्मिन् विषये चर्चा विहिता दृश्यते। भगवतः विविधस्वरूपवर्णनं समाजाय प्रेरणां ददाति। अहैतुकी अनन्या भक्तिरेव भगवत्प्राप्तये मुख्यं भवति इति अस्मिन् अध्याये प्रतिपाद्यते।

## उद्देश्यानि

अस्मिन् अध्याये सर्वे पाठकाः एतान् विन्दून् वेदिष्यन्ति।

- **पुरुषोत्तमक्षेत्रपरिमाणादिनिर्देशः**
- **भगवतः अष्टमूर्त्तिवर्णनम्**
- **भगवतः दारुमयस्वरूपकथनम्**
- **पुण्डरिकाम्वरीषोपाख्यानम्**
- **पुण्डरीकाम्वरीषयोः भगवत्प्राप्तिः**
- **उड्रदेशप्रशंसावर्णनम्**
- **इन्द्रद्युम्नोपाख्यानम्**

## पुरुषोत्तमक्षेत्रपरिमाणादिनिर्देशः

प्रपञ्चेऽस्मिम् जनानां मुक्तये परमसाधनभूतं पुरुषोत्तमक्षेत्रं पृथिव्यां लयरहितं विद्यते। अस्मिन् क्षेत्रे भगवतः कल्पान्तं यावत् वासो भवति। अस्य क्षेत्रस्य महत्त्वं यद्यपि सर्वैः ज्ञातं तथापि अस्य क्षेत्रस्य वर्णनं सर्वत्र समुपलभ्यते। साक्षात् लक्ष्मीः ब्रबीति पञ्चक्रोशमिदं पुरुषोत्तमक्षेत्रं समुद्रं यावत् विस्तृतं विद्यते। तत्रापि क्रोशत्रयं स्थानं सुवर्णवालुकाजीर्णं वर्तते यत्र नीलपर्वतः शोभते च। साक्षात् विश्वेश्वरः इन्द्रियसंयमपूर्वकं तस्य समुद्रस्य तीरे भगवन्तं जगन्नाथमारधयितुं विद्यते स्म। यमः तस्मिन् स्थाने भगवत्याः वचनं श्रुत्वा शिवं तोषयामास । ततः सः भगवान् शिवः यमेश्वरेति नाम्ना प्रख्यातः जातः। अस्य भगवतः यमेश्वरस्य दर्शनने कोटिलिङ्गस्य फलं प्राप्यते। अस्य क्षेत्रस्य आकारः शङ्खसदृशः, यस्य प्रतीच्यां दिशि क्रोशमेकपरिमितिं सर्वकामप्रदो वृषभध्वजः निलकण्ठः आस्ते। एतत् स्थानं समुद्रात् वटवृक्षं यावत् विद्यते। अस्य शङ्खक्षेत्रस्य उदरभागं समुद्रे वर्त्तते। तदर्थं समुद्रे स्नानस्यापि महत्त्वं परिकीर्त्तितम्। अस्य क्षेत्रस्य महत्त्वं यत् पुरुषोत्तमे क्षेत्रे मरणं, स्नानं तथा भगवतः जगन्नाथस्य दर्शनं चेतत् त्रयं मोक्षस्य द्वारभूतं भवति। कदाचित् महादेवः शिवः भगवतः पञ्चमं शिरः विच्छेद्य सर्वत्र च परिविभ्रम्य अस्मिन् क्षेत्रे आवर्त्तवेष्टनस्थाने तं कपालं परित्यक्तवान्। तस्मात् दिनात् ब्रह्मा कपालमोचनशिवाख्यं नाम धृत्वा तस्मिन् स्थाने विद्यते। यदि कस्यचित् अस्य कपालमोचनस्य दक्षिणपार्श्वे मृत्युर्भवति तर्हि तस्य कदाचिदपि पुनर्जन्म न भविष्यति। अस्मिन् क्षेत्रे तृतीयावर्त्तगामाद्यां या शक्तिः विद्यते सा विमला नाम्नी प्रथिता विद्यते। अत्रापि मुक्तेः साधनरूपी सा देवी सर्वेषां जन्मकर्मवन्धनहर्त्री वर्त्तते। यः अस्याः च देव्याः भक्तिपूतेन स्मरणं करोति तथा पूजादीनां विधानं करोति सः अनन्तं फलं भुङ्क्त्वा मुाक्तिं प्राप्नोति। शङ्खस्य नाभिप्रदेशे कुण्डत्रयमक्षयवटस्तथा साक्षात् भगवान् तिष्ठति। कपालमोचनात् शङ्खस्य मध्यभागं यावत् अर्द्धाशनी प्रतिष्ठिता विद्यते। महाप्रलयकाले वर्द्धितजले सृष्ट्या आद्यकाले भक्षणत्वात् अर्द्धाशनी इति प्रसिद्धिः। समुद्रजलात् अक्षयवटं यावत् कीटपतङ्गादीनां तथा मनुष्याणां यदि मृत्युः भवति तर्हि तेषां समेषां मुक्तिः भवति। त्रिलोके सार्द्धत्रिकोटिपरिमितानि यावन्ति तीर्थस्थानानि विद्यन्ते, तेषु सर्वेषु तीर्थेषु अस्य पुरुषोत्तमक्षेत्रस्य माहात्म्यं सर्वतोधिकं विद्यते। अत्रावस्थिताः सर्वेऽपि जन्ममरणादिविरहिताः सन्तः सर्वदा तिष्ठन्ति। रोहिणकुण्डस्य स्पर्शमात्रेणैव मुक्तिप्रदायकं भवति। प्रलयकाले अपि एतत् जलं तस्मिन् स्थाने लीनो भवति। अत्र विद्यमानानां सर्वेषां दर्शनेन मोक्षः अवश्यं लभ्यते। कामाख्यक्षेत्रपालविमलादीनां दर्शनं समेषां कृते मोक्षदायकं भवति।

भगवत: दक्षिणस्यां दिशि ब्रह्मस्वरूपभूत: साक्षात् नृसिंह: विद्यते यस्य भगवत: आराधनेन सकलपापानां विनष्टं भवति तथा सायुज्याख्यां मुक्तिं सर्वे प्राप्नुवन्ति। पुन: वटवृक्षस्य छाया अस्य नृसिंहस्य महादिप्तौ प्रदीप्तित: विद्यते, अत: अस्य वृक्षस्य अध: प्राणत्यागे सति सकलाया: मायाया: विनाशं भवति।

**बोधप्रश्न:**

१. शङ्खक्षेत्रं कस्य अपरं नाम वर्तते ?

२. पुरुषोत्तमक्षेत्रे क: वृक्ष: विराजते ?

## भगवत: अष्टमूर्त्तिवर्णनम्

भगवत: अपारकरुणया अस्य पुरुषोत्तमक्षेत्रस्य माहात्म्यं न कोऽपि वक्तुं शक्नोति। अस्मिन् स्थाने देवलोकस्य आनन्द: सर्वै: अनुभूयते। सकलानां तीर्थानां परित्यागं कृत्वा यदि कश्चित् अस्य तीर्थस्य शरणं प्रति याति तर्हि अवश्यं तस्य मुक्ति: भवति इति नास्ति लेशोऽपि सन्देहस्य अवकाश:। साक्षात् भगवत: दर्शनं लब्ध्वा यदि कश्चित् वायस: मुक्तिं प्रप्नोति तर्हि अन्येषां मानवानां का वा गतिर्न स्यात्। भगवान् अस्मिन् क्षेत्रे विविधानां शक्तीनां स्थापनं चकार। अन्तर्वेद्या: रक्षानिमित्तमष्टशक्तय: विद्यन्ते। भगवत: आदेशानुगुणं भगवती लक्ष्मी: अष्टमूर्त्तिरूपेण अस्मिन् पीठे विराजते। सा लक्ष्मी: भगवत: प्रीतये अष्टरूपेण अविर्भूता जाता। अस्य पुरुषोत्तमक्षेत्रस्य वटमूले अग्निकोणे मङ्गला, पश्चिमस्यां दिशि विमला, पूर्वभागे वायुकोणे सर्वमङ्गला, उत्तरस्यां दिशि अर्द्धाशिनी, ऐशानकोणे लम्वा, दक्षिणे कालरात्रि:, पूर्वस्यां दिशि मरीचिका, नैरुतकोणे चण्डरूपा शक्ति: विद्यते। एतासां शक्तीनां दर्शनं पुण्यप्रदं तथा येषां जनानां पुण्यमल्पं भवति ते कदाचिदपि एतासां दर्शनं कर्त्तुं न शक्नुवन्ति। कदाचित् भगवान् महादेव: अपि अष्टमूर्त्तिरूपेण अस्मिन् स्थाने भगवत: सान्निध्यं प्राप्तुमपि अवततार। सोऽपि अष्टरूपेण अस्मिन् पुण्यदेशे तिष्ठति। तत: भगवान् श्रीहरि: अपि तन्मध्ये स्थित्वा अष्टमूर्त्तिरूपेण भगवन्तं शिवं स्थापयामास। सर्वासु दिक्षु अष्टरुद्रान् प्रस्थापयामास। ते च अष्टरुद्रा: भवन्ति कपालमोचनकामक्षेत्रपालयमेश्वरमार्कण्डेश्वरविश्वेश्वरनीलकण्ठवटेश्वरश्चेत्यादय:। य: जन: अस्मिन् क्षेत्रे एतेषां देवानां भक्तिपूर्वकं पूजाविधानादि कुरुते स: अनन्तफलमुपैति।

**बोधप्रश्न:**

१. क: पुरुषोत्तमक्षेत्रे वेद्या: रक्षणं करोति ?

२. पूर्वस्यां दिशि क: देव: तिष्ठति ?

## भगवत: दारुमयस्वरूपकथनम्

एतेषाम् अष्टरुद्राणां वर्णनानन्तरं भगवान् नारायण: लक्ष्मीमुखेन यमं प्रति विविधानां तीर्थानां वर्णनं चकार। तत: यमं प्रति अस्य क्षेत्रस्य माहात्म्यं प्रबोधयामास। जन्ममरणविरहिता: सन्त: जना: अस्मिन् तीर्थे मुक्तिं प्राप्नुवन्ति इति वारम्वारं जुघोष। तत: लक्ष्मी: यमं प्रति भगवत: लीलामयस्य जगन्नाथस्य दारुमयस्वरूपादीनां विषये प्रबोधयामास। समयानुसारं पुरुषोत्तमे क्षेत्रे सर्वेषां यज्ञानामाहर्त्ता सच्छास्त्रवित् धर्मज्ञ: इन्द्रद्युम्न: भविष्यति। स: सहस्राश्वमेधं यागमपि करिष्यति। तस्य अनुग्रहं कृत्वा भगवान् दारुरूपेण अवतरिष्यति। साक्षात् विश्वकर्मा अस्य दारुभूताया: प्रतिमाया: निर्माणं करिष्यति। लक्ष्म्या: सम्वादं श्रुत्वा भगवान् धर्मराज: यम: स्वधाम प्रति जगाम। तत: जैमिनि: प्राह कलियुगे भगवान् साक्षात् तस्मिन् पुरुषोत्तमे क्षेत्रे दारुरूपेण जगन्नाथवलभद्रसुभद्रात्मकेन अंशने अवस्थित:। यस्य भगवत: जगन्नाथस्य दर्शनमात्रेणैव सर्वेषां पापं विनाशं भवति। जगत: तापत्रयाणां हारक: साक्षात् जगत: नाथ जगन्नाथ: दारुविग्रहेण पुरुषोत्तमे क्षेत्रे अवतीर्ण:। सर्वे च देवगन्धर्वराक्षसादय: तस्मिन् दारुमयस्य जगन्नाथस्य दर्शनार्थं विमोहिता: भवन्ति। वेदवेदान्तादिषु विविधेषु ग्रन्थेषु अस्य जगन्नाथस्य विषये चर्चा विहिता दृश्यते। समेषां दीनानां दु:खार्त्तानां परमोद्धारक: साक्षात् जगन्नाथ: क्षितितले पुरुषोत्तमे क्षेत्रे विराजते।

**बोधप्रश्न:**

१. दारुरूपेण क: देव: कलियुगे स्थास्यति ?

२. कै: सह जगन्नाथ: वर्तते ?

## पुण्डरीकाम्वरीषोपाख्यानम्

करुणामय: श्रीजगन्नाथ: समेषां जनानां पापं हरति। जनानां भक्त्या सन्तुष्ट: असौ देव: सर्वेषामपराधं शतं क्षमते। एतस्मिन् विषये उपाख्यानमेकं सर्वदा स्मर्यते। कुरुक्षेत्रे द्वौ ब्राह्मणक्षत्रियौ प्रादुर्भुतौ आस्ताताम्, यौ द्वौ परमसखायौ एकान्ते आहारविहारादीनि सर्वंणि कार्याणि एकत्र कुरुत: स्म। तौ द्वौ अस्वाध्यायवषटकारौ स्वधास्वहाविवर्जितौ अपात्रभूतौ धर्मस्य महापातकदूषितौ मधुक्षीवौ पण्ययोषित्सहवासौ मुदान्वितौ आस्ताताम्। कदाचिदपि स्वप्नेऽपि पारलौकिकचिन्ता तयो: मनसि नागता वर्तते। एवं प्रकारेण कालान्तरे विवर्तमानौ तौ द्वौ तावायुषोऽर्द्धं विनिन्यतु:। एकदा यज्ञमार्गेण गमनसमये तयो: यज्ञस्य संस्कारं दृष्ट्वा हर्षेण मन्त्रोच्चारणं च वीक्ष्य मनसि श्रद्धा आगता। तौ द्वौ अधार्मिकौ सखायौ कदाचित् धार्मिककार्ये प्रवेष्टुम् इयेषतु:। तयो: द्वयो: नाम भवति पुण्डरीकाम्वरीषौ। तदानीं तौ द्वौ स्वकृतं कर्म निन्दन्तौ केनोपायेन एतस्मात् निवृत्तिर्भवेतामिति चिन्तयामासतु:। एतस्मात् दुष्कृतसमुद्रात् कथं तरिष्याव: इति अपि अचिन्तयताम्। यथा पापानि आचरितानि वर्तन्ते न तेषां पापानां प्रायश्चित: शास्त्रेषु अपि विद्यते। तत: तौ द्वौ यज्ञगतान् पण्डितान् एतस्मात् पापात् कथं प्रमुच्यते इति असकृत् प्रश्नं पप्रच्छतु:। सर्वे एवं पण्डिता: चिन्तयामासु: केनापि उपायेन एतेषां पापानां नाश: न भविष्यति। अत: तेषु कश्चित् विद्वान्प्रवर: कथयामास यत् यदि द्वावपि एतस्मात् पापकार्यात् मुक्तिं वाञ्छत: तर्हि पुरुषोत्तमं क्षेत्रं प्रति गच्छत। तत्र भगवत: जगन्नाथस्य आराधनं कृत्वा कदाचित् एतस्मात् प्रमुच्यते। यस्मिन् पुरुषोत्तमे क्षेत्रे प्रभुविश्वेश्वरजनार्द्दन: इन्द्रद्युम्नस्य तपसा प्रसन्न: भूत्वा अवतीर्णो वर्तते। तस्य भगवत: आराधनाद्वारा सकलानां सञ्चितपापानां नाशो भवति। अत: पुण्यभूम्युत्कलप्रान्तस्य दक्षिणसमुद्रतटभागे नीलपर्वते भगवत: विभो: शरणं प्रति गच्छताम्। तत: तौ द्वौ पुरुषोत्तमक्षेत्रं प्रति गच्छत:। तत: सर्वस्मात् विमुक्तो भूत्वा तौ द्वौ पुण्डरिकाम्वरीषौ हविष्यान्नं भुङ्क्त्वा भगवत: श्रीजगन्नाथस्य ध्याने मग्नौ अभवताम्। तीर्थराजस्य समुद्रस्य जले स्नानं कृत्वा भगवत: प्रसादादि भोजनं समाप्य प्रणिपात: पुर:सरं भगवत: दर्शनार्थं सर्वदा अनुरक्ता: आसन्। यावत् पर्यन्तं तयो: दर्शनं न जातं तावत् पर्यन्तमनशनव्रतमपालयताम्। कदाचित् रात्रौ भगवत: नामकीर्त्तनं कृत्वा रात्र्या: तृतीयप्रहरे भगवत: दिव्यज्योतिं ददर्शतु:। पुनर्वारं दिनत्रयं यावत् स्थिररूपेण उपवासं चक्रतु:। तत: सप्तमरात्र्या: मध्यभागे भगवत: दर्शनं तथा देवानां स्तव श्रवणं कृत्वा दिव्यज्ञानं प्राप्नुत:।

**बोधप्रश्नः**

१. के द्वे मित्रे आस्ताताम्?

२. कस्मिन् प्रहरे भगवतः दिव्यज्योतिं ददर्शतुः?

## पुण्डरीकाम्वरीषयोः भगवत्प्राप्तिः

बहुप्रतीक्षानन्तरं द्वयोः भगवद्दर्शनं बभूव। तदानीं तौ द्वौ शङ्खचक्रगदापद्मायूधयुक्तं समस्तदिव्यालङ्कारेण विभूषितं भगवन्तं ददर्शतुः। यस्य नयनद्वयं श्वेतपद्मयुक्तं मुखमण्डलं प्रसन्नं तथा वामपार्श्वे वामवाहुद्वारा लक्ष्मीः आलिङ्गिता वर्त्तते। नारदादि सर्वेऽपि मुनयः तस्य भगवतः सम्मुखे उपविश्य गीतगानं कुर्वन्ति। भगवतः वक्षस्थले स्थितकौस्तुभमणिना प्रस्फुटितसुन्दरदेवाः प्रद्योतन्ते। तस्य मस्तकोपरि अनवरतं पुष्पवृष्टिर्भवति। अप्सरसः सर्वाः अपि भगवतः प्रसन्ननिमित्तं विविधया अङ्गभङ्ग्या नरिनृत्यन्ते। तदानीं पुण्डरीकः समस्तविद्यायां पारङ्गतो भूत्वा भगवतः दर्शनं कृत्वा साष्टाङ्गं प्रणिपत्य अस्तुवत्। सचराचरस्य ब्रह्माण्डस्य नायकः सृष्टिस्थितिप्रलयादीनां कारणं समेषां जनानां रक्षकः परमात्मा श्रीजगन्नाथः सर्वैः आवृत्तो भूत्वा प्रचकास्ति। पुण्डरीकः असकृत् भगवन्तं नमति। ततः प्राह हे भगवन्! सकलस्य जगतः आधारूपेण भवान् एव स्थितो विद्यते। योगिनः सर्वेऽपि भवन्तं ध्यात्वा परमपदं प्रति यान्ति। मुढ़बुद्धिमानवाः कदाचिदपि भगवतः स्वरूपं ज्ञातुं न शक्नुवन्ति। येषां मनः कामार्थं प्रति लोभं प्रति व्याकुलं भवति ते जनाः कदाचिदपि सान्निध्यं प्राप्तुं न शक्नुवन्ति। पुनः पुण्डरीकः आत्मानं कामार्थी लोभी दीनहीनरूपेण भर्त्सनं कृत्वा भगवतः शरणापन्नो बभूव। पुनः ब्रबीति यत् सकलानां यज्ञानां धारयिता तथा विविधानां कर्मणां फलदाता साक्षात् जगन्नाथः एव विद्यते। संसारसागरात् जनान् केवलं भवान् एव रक्षति। अन्ये च देवाः सर्वेऽपि कदाचिदपि प्रत्यक्षरूपेण मुक्तिप्रदायकाः न भवन्ति, परन्तु यः भगवतः श्रीजगन्नाथस्य शरणं प्रति याति सः अवश्यं मुक्तिः लभते। एवं रूपेण पुण्डरीकः स्वीयस्तवेन भगवन्तं तोषयामास। ततः अम्वरीषः प्रोवाच हे सर्वात्मरूपी भगवन्! चतुर्विधस्य जगतः निर्माणे उभयमुपादाननिमित्तकारणं भवान् एव। भवतः पादात् समुद्भुता गङ्गा सकलान् त्रिलोकान् पवित्रयति। यस्य नामसस्मरेण एव ब्रह्महत्यादीनां पापानामपि नष्टं भवति सः जगदीश्वरः परमात्मा भवान् एव। केवलं भवन्तं प्रति

अहैतुकी भक्तिः यथा मम स्यात् तथाशीर्वादं देहि। यया शक्त्या पितामहः ब्रह्मा जगत् सृजति यया शक्त्या भगवती लक्ष्मीः भवतः नित्याराधनां च करोति। भगवद्भक्तिरेव आवयोः परमसाधिका विद्यते। एतस्मात् पापक्लेशात् विमुच्य यथा आवां पुण्यभाजौ भविष्यावः।

**बोधप्रश्नः**

१. के जनाः भगवन्तं प्राप्तुं न शक्नुवन्ति ?

२. देवर्षिः कः ?

## उड्रदेशप्रशंसावर्णनम्

विविधाः कथाः जैमिनिः ऋषीणां सम्मुखे कथयामास। ततः सर्वेऽपि मुनयः अस्य पुरुषोत्तमस्य क्षेत्रस्य वर्णनं श्रुत्वा कस्मिन् प्रदेशे इदं क्षेत्रं विद्यते इति परिपप्रच्छुः। ततः जैमिनिः उत्कलप्रदेशस्य वर्णनं कृतवान्। विविधानां तीर्थानां पुण्यस्थले उत्कलप्रदेशे पुरुषोत्तमाख्यं परमपावनं क्षेत्रं विद्यते। अयं देशः समुद्रस्य दक्षिणस्यां दिशि प्रवर्त्तते। तस्य देशस्य जनाः सदाचारपरायणाः ब्राह्मणानुरक्ताः वेदज्ञाः वेदाध्ययने तत्पराः भवन्ति। सृष्टेः आरम्भादेव अस्मिन् क्षेत्रे विविधानां यागयज्ञानां विधानं भवति। अयं देशः अष्टादशविद्यानां स्थलम् इति सर्वे अभिप्रयन्ति। साक्षात् लक्ष्मीः भगवतः आज्ञानुसारं प्रत्येकं गृहे नित्यं तिष्ठति। सर्वेऽपि जनाः वैष्णवाः भगवद्भक्ताः नित्यमातृपितृभक्ताः सत्यवादिनः विनयपरायणाः अधिव्याधिक्लेशादिविरहिताः भवन्ति। सर्वाः स्त्रियः सदाचारपरायणाः लज्जाशीलाः रूपयौवनयुक्ताः स्वधर्मनिष्ठाः भवन्ति। वर्णानुगुणं सर्वे स्वीयकर्मणा अनुरक्ताः तथा सेवापरायणाः सन्तः नित्यं देवान् पितृण् ऋषीन् अभ्यर्थयन्ति। सर्वे ब्राह्मणपरायणाः भूत्वा तीर्थं यज्ञं दानं च आचरन्ति। अकाले कदाचिदपि अत्र वर्षाः न भवन्ति। प्रजाः सर्वेऽपि कदाचिदपि क्षुधया आतुराः च न भवन्ति। पृथिव्यां न किमपि वस्त्रं तत्र दुर्लभं भवति। अयं प्रदेशः निखिलगुणसम्पन्नः वृक्षलताभिः सुशोभितः दृश्यते। अत्र अर्जुनाशोकपुन्नागतालसन्तालपनसकपिथचम्पकवकुलपाटलकदम्वाम्राम्रचलजम्बीरपारिजातखर्जुर-वटचन्दनसिद्धमुचुकुन्दतिन्दुकसप्तपर्णनागरङ्गादयः सर्वेऽपि वृक्षाः परिदृश्यन्ते। विविधाः वृक्षाः लताः उद्यानानि

नद्यः पर्वताः अस्मिन् उड्रदेशे विद्यन्ते। विविधानां तीर्थानां समावेशः अत्र भवति। पृथिव्याः भूस्वर्गरूपेण अयं प्रदेशः सुतरां क्षितितले रराजते।

**बोधप्रश्नः**

१. पुरुषोत्तमक्षेत्रं कस्मिन् देशे विद्यते ?

२. सर्वतीर्थानां समावेशः कुत्र भवति ?

## इन्द्रद्युम्नोपाख्यानम्

सत्ययुगे सूर्यवंशे इन्द्रद्युम्ननाम्ना कश्चित् राजा आसीत्। सः इन्द्रद्युम्नः धर्मात्मा तथा ब्रह्मणः पञ्चमपुरुषः आसीत्। सः इन्द्रद्युम्नः सत्यवादी, सदाचारपरायणः, सात्त्विकः, न्यायवान् निष्पापश्च आसीत्। सः आत्मतत्त्ववित् मातृपितृभक्तः ब्राह्मणपूजकः ज्ञानशौण्डः संग्रामवर्द्धनश्च बभूव। सः राजा अष्टादशविद्यासु द्वितीयबृहस्पतिः, ऐश्वर्ये अमरेन्द्रः, धनधान्ये कुवेलतुल्यः आसीत्। पुनः सः रूपवान्, शुभगः, सुशीलः, दाराभोक्ता, प्रियभाषी, निखिलयज्ञानुष्ठानकर्त्ता, सत्यप्रतिज्ञः, पूर्णचन्द्रसदृशः, शत्रुतापनः, जितक्रोधः, जितेन्द्रियश्च बभूव। मुक्तिकामये सोऽपि राजसूयाश्वमेधादीन् यज्ञान् सम्पादितवान्। एतादृशरूपेण सः राजा इन्द्रद्युम्नः पृथिव्याः पालको भूत्वा अमरावतीतुल्य सुविख्याताया: अवन्त्याः नगर्य्याः भूपतिः आसीत्। कदाचित् सः परमधर्मिकः राजा देवार्च्चनं कृत्वा दैवज्ञैः श्रोत्रियैः सार्द्धं विहरणसमये पृथिव्यामुत्तमक्षेत्रस्य विषये ज्ञायतां व्याजहार। ततः सर्वेऽपि ब्राह्मणाः विचारं कृत्वा उड्रप्रदेशस्य पुरुषोत्तमक्षेत्रस्य विषये कथयामासुः। कश्चित् ब्राह्मणः प्रोवाच यत् इदं पुरुषोत्तमक्षेत्रं चतुस्त्रसु दिक्षु वृक्षलताभिः परिव्याप्तमस्ति। अस्य क्षेत्रस्य कल्पवृक्षः ऐहिकपापानि विनाशयति। पश्चिमस्यां दिशि रोहिणकुण्डस्य दर्शनमात्रेणैव मुक्तिप्रदायकं भवति। पूर्वभागे नीलकान्तमणिनिर्मितवासुदेवस्य मूर्त्तिः विद्यते। इदं क्षेत्रं साक्षात् मुक्तिप्रदं भवति। अस्मिन् रोहिणकुण्डे स्नात्वा भगवतः श्रीजगन्नाथस्य दर्शनमात्रेणैव परमपुरुषार्थस्य सिद्धिर्भवति। तत्र शवरालयः इति नाम्ना कश्चित् आश्रयः वर्तते येन मार्गेण विष्णोः आलयं प्रति गम्यते। तत्र साक्षात् भगवान् शङ्खचक्रगदापद्मादि धृत्वा स्थितो वर्त्तते। दर्शनमात्रेणैव जीवाः सर्वेऽपि मुक्तिं प्राप्नुवन्ति। तत्र भगवतः दर्शननिमित्तं प्रतिदिनं देवाः अपि समायान्ति। अनवरतं विविधस्तुतिवाद्येन सुशोभितो भवति। कदाचित्

तस्मिन् स्थाने कश्चित् तीर्यग्योनिः वायसः अपि नीलमाधवस्य स्नानानन्तरं दर्शनं लब्ध्वा मुक्तिं पपौ। ततः अस्य क्षेत्रस्य माहात्म्यं श्रुत्वा सर्वे अस्मिन् पुरुषोत्तमे क्षेत्रे स्थातुं चिन्तयामासुः। सर्वदा भगवतः पुरुषोत्तमस्य दर्शनं कृत्वा चतुर्वर्गानां प्राप्तये प्रयतन्ते स्म। ततः सः राजा इन्द्रद्युम्नः देशभ्रमणशीलैः अनुचरैः सह पुरुषोत्तमक्षेत्रं प्रति गन्तुम् उद्यतो बभूव। एतैः सह विद्यायतिः अपि अव्रजत्।

**बोधप्रश्नः**

१. इन्द्रद्युम्नः कः?

२. इन्द्रद्युम्नस्य पुरोहितः कः?

## सारांश:

अध्यायेऽस्मिन् पुरुषोत्तमक्षेत्रस्य परिमाणं सर्वादौ परिकीर्त्तितं विद्यते। अस्य पुरुषोत्तमक्षेत्रस्य काननादीनां तथा विविधानां तीर्थानां वर्णनं प्रतिपादितं वर्तते। अस्य क्षेत्रस्य सुरक्षार्थं भगवतः विविधरूपाणि प्रतिपादितानि सन्ति। पञ्चक्रोशमिदं पुरुषोत्तमक्षेत्रं काननारण्ये वर्तते। अस्य क्षेत्रस्य महिमावर्णनप्रसङ्गे विविधानामुपाख्यानानां चित्रणं यद्यपि श्लाघ्यते तथापि पुण्डरीकाम्वरीषयोः सकलं चरितं वर्णनं पुर:सरं तयोः भगवत् प्राप्तिविषयः परिचर्च्यते। विष्णोः आदेशानुसारं देव्याः लक्ष्म्याः विमलामङ्गलादिरूपेण अष्टमूर्त्तिधारणं वर्णितमस्ति। पुनः भगवतः प्रीतये साक्षात् महादेवस्य अष्टविधरूपेण विद्यमानविषयं प्रस्तूयते। अत्र विधिवत् भगवतः नामसङ्कीर्त्तनं तथा स्तुतिः प्रतिपादिता विद्यते। उड्रप्रदेशस्य वर्णनं तथा पुरुषोत्तमक्षेत्रस्य वर्णनमभिहितं वर्तते। सकलेषु प्रदेशेषु उत्कलप्रदेशस्य महत्ता तथा माहात्म्यं प्रदर्शितं भवति। अत्र समेषां पापाहारकत्वेन क्षेत्रमिदं स्वतन्त्रतां प्राप्नोति। यस्य पुरुषोत्तमक्षेत्रस्य दर्शनेन अपारकृपा लभ्यते तदपि निरूपितं वर्तते। अवन्त्याः राज्ञः इन्द्रद्युम्नस्य विषये अस्मिन् अध्याये वर्णितो भवति।

# आदर्शप्रश्ना:

## लघुत्तरीयप्रश्ना:

१. उत्कलप्रदेशस्य महत्त्वम्।

२. इन्द्रद्युम्नस्य परिचय:

३. भगवत: नीलमाधवस्य स्वरूपम्।

## विश्लेषणात्मकप्रश्ना:

१. पुरुषोत्तमक्षेत्रस्य परिमाणं वर्णयत।

२. पुण्डरीकाम्वरीषयो: मुक्तविवरणं विशदयत।

३. पुरुषोत्तमक्षेत्रस्य महत्त्वं वर्णयत।

## निवन्धात्मकप्रश्ना:

१. इन्द्रद्युम्नोपाख्यानं स्पष्टयत।

२. पुण्डरीकाम्वरीषयो: चरितं विशदयत।

३. पुरुषोत्तमक्षेत्रे विद्यमानाष्टमूर्त्तिस्वरूपस्य विवेचनां कुरुत।

## एकाङ्कप्रश्ना:

१. अवन्तीनरेश: क: ?

२. कस्मिन् पर्वते पुरुषोत्तमक्षेत्रं विद्यते ?

३. स्कन्धपुराणे कति श्लोका: विद्यन्ते ?

४. इन्द्रद्युम्नस्य पौरहित: क: ?

५. मार्कण्डेयखात: कुत्र विद्यते ?

६. पुरुषोत्तमक्षेत्रस्य अग्निकोणे का तिष्ठति ?

७. पुरुषोत्तमक्षेत्रस्य पश्चिमस्यां दिशि का विद्यते ?

८. कस्य देवस्य अष्टमुर्त्तय: भवन्ति ?

९. कस्मिन् देशे पुरुषोत्तमक्षेत्रं विराजते ?

१०. केन रूपेण आदौ भगवान् आसीत्?

११. नीलकण्ठः कः वर्तते?

१२. कः नीलमाधवस्य दर्शनार्थम् आगतवान्?

**उत्तराणि**

१. इन्द्रद्युम्नः २. नीलगिरिपर्वते ३. ८१००० ४. विद्यापतिः ५. पुरुषोत्तमक्षेत्रे ६. मङ्गला

७. विमला ८. शिवस्य ९. उड्रदेशे १०. नीलमाधवरूपेण ११. शिवः १२. विद्यापतिः

# तृतीयोऽध्याय:

## प्रस्तावना

पुर्वस्मिन् अध्याये पुरुषोत्तमक्षेत्रस्य सविस्तरं परिमाणं तथा महत्त्वं पुन: इन्द्रद्युम्नस्य उपाख्यानं प्रतिपादितम् आसीत्। अध्यायेऽस्मिन् भगवत: नीलमाधवस्य वर्णनादि विविधा: विषया: प्रोच्यन्ते। अस्य अध्यायस्य महत्त्वं वर्तते यत् साक्षात् नीलमाधवस्य दर्शनार्थं स्वर्गादपि देवा: प्रत्यहं नित्यकर्म समाप्य स्वकर्मणि प्रवृत्ता: भवन्ति। शवरस्य इहलोके यथा सौभाग्यं भगवत: प्रसादात् भवति न कस्यचित् अपि राज्ञ: तथा पुण्यं वर्तते।

## उद्देश्यम्

अस्मिन् अध्याये छात्रा: अधोभागे प्रतिपादितान् अंशान् ज्ञास्यन्ति।

- **विद्यापतिसम्वाद:**
- **विद्यापतिविश्वावसुसम्वाद:**
- **भगवत: अदर्शनम्**
- **इन्द्रद्युम्ननृपते: विद्यापतिं प्रति पुरुषोत्तमक्षेत्रविषयक: परिप्रश्न:**
- **विद्यापतिना पुरुषोत्तमक्षेत्रस्य विवरणप्रदानम्**

## विद्यापतिसम्वाद:

ततः मनसि सर्वदा विद्यापतिः भगवतः जगन्नाथस्य चिन्तनम् अकरोत्। गमनमार्गे सः विद्यापतिः एवं चिन्तयामास यत् यस्य स्मरणमात्रेणैव सर्वेषां जनानां जन्मान्तरपापानि विनश्यन्ते, तस्य भगवतः दर्शनम् अद्य तस्य कृते रुचिरं भविष्यति। श्रुतिस्मृत्यादयः यस्य देवस्य स्मरणं कुर्वन्तः सन्ति तथा सर्वाणि पुराणानि यस्य नाम कीर्त्तनं कुर्वन्ति तस्य दर्शनगतापूर्वं फलमद्य अवश्यं प्रास्यति। सः विद्यापतिः मनसि अचिन्तयत् यत् अद्य अध्यात्मदेवस्य श्रीजगन्नाथस्य पुण्यं दर्शनं भविष्यति, एतस्मात् अधिकं किमपि पुण्यं कदाचित् मनसि न विद्यते। यस्य लोमे विश्वब्रह्माण्डं परिव्याप्तमस्ति, यः सर्वेषां वेदानां सारभूततत्त्वं वर्त्तते, यस्य नामसङ्कीर्त्तनेन इहलोकजन्यं पापं नश्यति, तस्य दर्शनं कृत्वा मनसि वैराग्यम् आयास्यति। यतः अस्य चराचरस्य विश्वस्य सृष्टेः कारणं यः विद्यते, यः अविनाशी तस्य दर्शनमात्रेणैव प्रणामं व्याहरिष्यति इति मनसि विचिन्त्य सः मार्गे अव्रजत्। अनेन क्रमेण वनदुर्गादीनि अतिक्रम्य सः सूर्यास्तसमये महानदीतटे उपस्थितो बभूव। सः विद्यायतिः रथात् अवतीर्य आह्निकक्रियां सम्पादयामास। ततः सन्ध्यासमये उपासनां विधाय मधुसूदनस्य चिन्तनमकरोत्। ततः एकाम्रकाननम् उभयतः याज्ञिकान् तेजस्वीब्राह्मणान् ददर्श। दूरादेव सः विद्यापतिः नीलाचलपर्वतम् ददर्श। यस्य पर्वतस्य दर्शनमात्रेण पापं विनश्यति। ततः सः विद्यापतिः भगवतः दर्शननिमित्तं कमपि मार्गं न प्राप्तवान्।

ततः सः मार्गे कुशविस्तारं चकार। तथा च तत्र शयन कृत्वा भगवतः दर्शनार्थं तस्य शरणापन्नो बभूव। नीलपर्वतस्य पश्चादभागे ये जनाः परस्परभगवद्भक्तिविषयकम् आलापम् अकुर्वन् तेषां वाक्यानि सुश्राव। तस्मिन् स्थाने विद्यापतिः शवराणां दर्शनं चकार। यस्मिन् स्थाने सः विद्यापतिः आसीत् तस्मिन् स्थाने शवराणां वासगृहम् आसीत्। विद्यापतिः तान् विष्णोः परमभक्तान् शङ्खचक्रगदाधरान् शवरान् ददर्श। कदाचित् विश्वावसुर्नाम शवरः हरेः पूजादिकर्माणि अवसाय पूजावसानपूर्वकं तस्य चन्दनादि धारणं कृत्वा विद्यापतेः नयनाभिमुखी अभूत्। तस्य दर्शनं कृत्वा विद्यापतिः मनसि धन्यो बभूव। विष्णो परमभक्तरूपेण अस्य दर्शनं तस्य कृते महत्पुण्यप्रदमिति सः चिन्तयामास। एतस्मात् विष्णोः परमकल्याणवार्त्तां श्रृत्वा धन्यो भविष्यति इत्यपि सः अचिन्तयत्। विश्वावसुः तं विद्यापतिं प्रति गत्वा सम्बोधयामास तथा तस्य अभ्यर्थनां कृत्वा शुभाभिगमनस्य कारणं पप्रच्छ। ततः विद्यापतिः तं शवरश्रेष्ठं भगवतः दर्शनार्थं समागतो वर्तते इति अभाषत। विद्यापतिः तदानीं स्वस्य परिचयं दत्वा भगवतः

दर्शनार्थं महदनुरागं प्रदर्शितवान्। यावत् पर्यन्तं भगवतः सम्वादं नीत्वा इन्द्रद्युम्नं प्रति न यास्यति तावत् पर्यन्तं सः किमपि न भुङ्क्त्वा अनशनपूर्वकं स्थास्यति इति अब्रवीत्।

**बोधप्रश्नः**

१. कस्मिन् समये भगवतः स्मरणं विद्यापतिः चकार ?

२. संसारसागरात् कः उद्धरति ?

## विद्यापतिविश्वावसुसम्वादः

विद्यापतिः यावत् पर्यन्तं भगवतः विष्णोः दर्शनं न भविष्यति तावत् पर्यन्तं भोजनमपि न स्वीकरिष्यति इति प्रोवाच। ततः शवरराजः विश्वावसुः चिन्तयामास यदि एनं दर्शनं लभ्यते तर्हि गोपनीयं रहस्यं सर्वं कदाचित् बहिः अवश्यमागमिष्यति। पुनः यदि दर्शनं नाङ्गीक्रियते तर्हि ब्राह्मणः शापं दत्वा गमिष्यति अतः किं कर्त्तव्यविमूढ़ो भुत्वा विश्वावसुः प्राचीनजनप्रवादं विचिन्त्य नीलमाधवं भूमितले स्थापयामास। सः विद्यापतिः प्राह यत् इन्द्रद्युम्नः अत्र समागत्य सहस्राश्वमेधं यागं कृत्वा भगवतः मूर्त्तिस्थापनं करिष्यति। ततः स्वदेहे स्वर्गलोकं प्रति यास्यति। विश्वावसुः ततः ब्राह्मणस्य विद्यापतेः भगवद्दर्शननिमित्तं स्वीकृत्य मार्गे जगाम। तदानीं सः प्रोवाच यत् सर्वे अत्र जानन्ति यत् इन्द्रद्युम्नः इदं स्थानं प्रति आगमिष्यति। परन्तुं तस्मात् बहुपुण्यभाक् विद्यापतिः इति आह, यतोहि तस्य दर्शनात् प्रागेव विद्यापतिः अस्य देवस्य दर्शनं करिष्यति। एवं प्रबोधयन् सः विश्वावसुः कण्टकदुर्गमे सङ्कीर्णस्थाने अन्धकारमयमार्गे विद्यापतिं प्रबोधयित्वा रोहिणकुण्डस्य पुरतः अतिष्ठत्। ततः विद्यापतिं प्रति विश्वावसुः अस्य रोहिणकुण्डस्य महत्त्वं प्रबोधयामास, यत् अस्मिन् कुण्डे स्नानानन्तरं मानवस्य देहे यावन्ति पापानि विद्यन्ते तानि सर्वाणि नष्टानि भविष्यन्ति। अस्य कुण्डस्य पूर्वभागे विशालवटवृक्षः विद्यते। अस्य छायायां ब्रह्महत्यादिपातकानि अपि नश्यन्ति। अनयोः द्वयोः मध्यनिकुञ्जे वेदपुरुषः साक्षात् विष्णुः तिष्ठति। यस्य दर्शनमात्रेणैव सकालानां पापानां विनाशं भूत्वा ऐहिकफलं त्यक्त्वा मानवः विष्णुलोकं प्रति याति। ततः विद्यापतिः भगवतः दर्शनं कृत्वा विविधस्तुतिमाध्यमेन आराधनां चकार।

विद्यापति: भगवन्तं प्रति प्रणामाञ्जलिं ज्ञापनं कृत्वा अस्तुवत्। श्रुतिस्मृतिपुराणेतिहासादीनां आराध्यविषय: साक्षात् भगवान् विष्णुरेव। सकलस्य जगत: प्राणाधाररूपेण क्षितितले अवतीर्णो वर्तते। प्रलयकाले जगत् सम्पूर्णं भगवत: उदरे अन्तर्हितो भवति। वेदा: भवन्ति भगवत: स्वरूपभूता:। विद्यापति: भगवत: पादपद्मे शरणापन्नो भूत्वा क्लेशेभ्य: उद्धारनिमित्तं विविधस्तुतिमकरोत्। तत: भगवत: सम्मुखे उपविश्य जपादिकं चकार। तत: स: शवरराज: विश्वावसु: विद्यापतिं प्रति प्रोवाच यत् भगवत: आराधनां कृत्वा भवान् सम्पूर्णपापात् विमुक्तो अभूत्। इदानीं गृहं प्रति गमनस्य समय: समायात:। अत: सूर्यास्तात् प्रागेव गृहं प्रति गन्तव्यं भवति। भगवत: दर्शनं सम्प्राप्य स: विद्यापति: क्षुधातृषार्त्तजनितदु:खेभ्य: विरतो बभूव। तत: स: विद्यापति: दुर्गमकण्टकजनितमार्गे अपि क्लेशं विना अगच्छत्। परिशेषेन विद्यापति: विश्वावसुना साकं सायं समये शवरगृहे प्राविवेश। तत: सर्वे शवरा: अन्नादि विविधानि भोज्यद्रव्याणि स्वीकृत्य विद्यापतिं प्रति समाजग्मु:। ब्राह्मण: विद्यापति: शवरगृहे एतादृशानि द्रव्याणि दृष्ट्वा विस्मितोऽभवत्। तदानीं स: परिपप्रच्छ यत् एतादृशानि भोजनानि कदाचित् राजप्रसादे अपि दुर्लभानि भवन्ति। परन्तु तादृशं भोजनं कथं शवरगृहे लभ्यते। तत: विद्यापति: विस्मितो भूत्वा विश्वावसुं प्रति प्राह हे भगवन् यादृशानि भोजनानि भवद्भि: प्रस्तुतानि तानि सर्वाणि न मनुष्यकृतानि विद्यन्ते, अत: केन प्रकारेण एतेषां पाक: विहित:। पुन: कदाचित् नृपादय: अपि एतादृशं भोजनमपि न प्राप्नुवन्ति। तत: विश्वावसु: किमपि न गोपनं कृत्वा श्रद्धापूर्वकं सकलं रहस्यं श्रावयामास। सर्वे देवा: प्रत्यहं भगवत: दर्शनार्थं विविधानि द्रव्याणि नीत्वा पूजार्थं दिव्यभोजनमपि स्वीकृत्य समायान्ति। अत: तस्मात् एतादृशं भोजनं भवान् पुण्यकारणत: प्राप्तवान् । तत: विष्णो: निर्माल्यं भुङ्क्त्वा दशसहस्रवर्षेभ्य: सर्वे शवरा: परमायुंषिसम्प्राप्ता: विद्यन्ते। यस्य प्रसादस्य भोजनेन मुक्ति: अवश्यं स्यात् तथा सकलानां पापानां विनाशो भवति तादृशं दिव्यं भोजनं शवर: सर्वदा प्राप्नोति इति चिन्तयित्वा ब्राह्मण: विमोहितो बभूव। स: विद्यापति: सर्वान् त्यक्त्वा एतेन सह मित्रतां संस्थाप्य तत्रैव स्थातुं विचार: कृत:। भगवत: नामसङ्कीर्त्तनं कृत्वा एतेन प्रसादेन सन्तुष्टो भूत्वा भगवत: सान्निध्यं प्राप्स्यामि इति मनसि वारम्वारं द्विज: चिन्तयामास। तत: भगवत: प्रसादं लब्ध्वा एतस्मात् संसारसागरात् विमुक्तिर्भविष्यति। अत: आत्मानं उत्तमकर्मभाक् इति मन्यमान: स: द्विज: विश्वावसुना सह विविधवार्त्तां कृत्वा अवन्तीं प्रति पुन: यातुं निवदनं कृतवान्। तत: स: शवरराज: इन्द्रद्यम्नस्य विषये अपि जनश्रुतिं श्रावितवान्। विश्वावसु: कथयामास यत् कदाचिदपि राजा इन्द्रद्यम्न: भगवत:

दर्शनं कर्तुं न शक्नोति। तस्मात् प्राक् भगवान् अन्तर्हितो भविष्यति। एवं च विद्यापतेः परमसौभाग्यकारणतः भगवतः दर्शनमभवत् इति अवोचत्। विद्यापतिः समुद्रजले स्नानं कृत्वा ततः परं भगवतः दर्शनं समाप्य अवन्तीं प्रति पुनः अव्रजत्।

| **बोधप्रश्नः** |
|---|
| १. शवरराजः कः ? |
| २. नीलसमुद्रं कुत्र विद्यते ? |

## भगवतः अदर्शनम्

इन्द्रद्युम्नस्य पुरोहितः ब्राह्मणकुलसर्वस्वभूतः पण्डितशिरोमणिः विद्यापतिः स्वं नगरं प्रति प्रत्यावर्तितो बभूव। ततः सर्वे च देवाः सांयकाले पूजानिमित्तं तत्र विद्यमानाः आसन्। परन्तु कुत्रचित् अपि भगवतः दर्शनं न प्राप्तवन्तः। तस्मिन् समये वेगवान् वायुः प्रवाहितो अभूत्। सर्वत्र वालुकाराशिः विच्छिन्नो बभूव। देवाः सर्वे भगवतः दर्शनं न लब्ध्वा खिन्नमनसा अध्यायन्। सर्वे च देवाः केवलं तत्र वालुकाराशिं ददर्शुः। कदाचिदपि रोहिणकुण्डं तथा नीलमाधवस्य दर्शनं न प्राप्तुमर्हन्। देवानाम् इन्द्रियाणि व्याकुलितानि अभूवन्। नेत्रयोः तृप्त्यर्थं भगवतः दर्शनं न अभूत्। किमर्थं भगवान् अन्तर्द्धानः अभवत् इत्यस्मिन् विषये सर्वे व्याकुलेन चिन्तयामासुः। येषां कृते भगवान् स्वयं कलेवरमधारयत् तान् त्यक्त्वा सः भगवान् कुत्र अव्रजदिति सर्वे परस्परं प्रश्नकरणं चक्रुः। यदि भगवतः दर्शनं न लभ्यते तर्हि स्वर्गपूरे किं कार्यमिति सर्वे अचिन्तयन्। भगवतः मुखारविन्दस्य दर्शनं विना न किमपि प्रयोजनं संसारे विद्यते। सर्वे देवाः विष्णुम् अतिरिच्य अनाथाः इति मन्यमानाः अविभ्रमन्। सर्वेषां देवानां दीनदुःखं दृष्ट्वा आकाशात् काचित् वाणी प्रसारिता जाता बभूव। भगवान् पुनर्वारं देहं धरिष्यति इति नास्ति सन्देहः। अतः सर्वे देवगन्धर्वकिन्नरादयः स्वं धाम प्रति व्रजन्तु इति। पृथिव्यां भगवतः दर्शनं दुर्लभं भवति। अतः अस्मिन् क्षेत्रे यः भगवतः स्मरणं करोति तथा विग्रहं ध्यायति सः अवश्यं पुण्यभाक् भविष्यति। देवाः सर्वे एतत् श्रुत्वा ब्रह्माणं प्रति जग्मुः। तदानीं भगवान् ब्रह्मा सर्वेभ्यः देवेभ्यः प्रबोधयन् सकलानि रहस्यानि कथयामास। भगवतः दारुमयदेहस्य चित्रणमपि अकरोत्।

**बोधप्रश्नः**

१. के भगवतः दर्शनार्थं समागताः आसन्?

२. सर्वदेवेषु श्रेष्ठदेवः कः?

## इन्द्रद्युम्ननृपतेः विद्यापतिं प्रति पुरुषोत्तमक्षेत्रविषयकः परिप्रश्नः

विद्यापतिः रथारूढ़ो भूत्वा अवन्तीं प्रति प्रस्थानं चकार। मार्गे सः असकृत् भगवतः चिन्तनं कृत्वा विग्रहादिकं सदा अस्मरत्। यस्य नामकीर्त्तनेन मनसि ग्लानिदूरीभवति तथा सांसारिकदुःखानां निवृत्तिर्भवति तस्य पुरुषोत्तमस्य क्षेत्रस्य दर्शनं कृत्वा सः धन्यो बभूव। तस्मिन् पुरुषोत्तमक्षेत्रे कानने विविधाः खगाः विहरन्ति। उद्याने सदासर्वदा भ्रमराणां झङ्कारः श्रूयते। वृक्षाणां तथा छायाः विद्यन्ते यत्र सूर्यस्य आतपः कदाचिदपि न प्रविशति। तत्र पृथिव्यां तादृशं पुष्पं न विद्यते यत् तस्मिन् कानने न प्रस्फुटितो भवति। ततः सः द्विजः सन्ध्यासमये श्रीक्षेत्रं परित्यज्य स्वनगरं प्रति समायातो बभूव। तस्य विद्यापतेः आगमनस्य सन्देशं श्रुत्वा सः आनन्दितः अभूत्। यदा विद्यापतिः नगरं प्रति समागतो बभूव तदानीं सिंहासनतः अवतीर्य राजा इन्द्रद्यम्नः तं प्रति आगत्य अभ्यर्थयामास। सः राजा भगवतः कलेवरसमुज्ज्वलिताङ्गरागं दृष्ट्वा साक्षात् भगवतः दर्शनं प्राप्तवान् इति मनसि चिन्तयामास। सः असकृत् भगवतः अङ्गरागमालां प्रणामं चकार। ब्राह्मदीन् देवगणान् अपि यद् दुर्लभं भवति तत् सम्प्राप्य मनसि धन्यः अभवत्। श्रीविष्णोः कलेवरं तथा तस्य सान्निध्यं लब्ध्वा मनः प्रफुल्लितो जातः। इन्द्रद्युम्नस्य मनसि भगवतः पादपद्मे साक्षात् सः विद्यते इति मनसि यत् गर्वम् आसीत् तत् सर्वं अपि खण्डितमभूत् यतोहि एषा माला अपि भगवतः समीपे आसीत्। एतस्य कुसुमस्य सौन्दर्यं लक्ष्मीतःअपि न न्यूनं वर्तते, पुनः एषा माला सपत्नीवोधे अपि लक्ष्मीदेवीम् उपहासकर्त्तुं समर्था वर्तते। ततः विद्यापतिः भगवतः विषये प्रोवाच। भगवान् साक्षात् इन्द्रद्युम्नस्य गमनार्थम् आज्ञां दत्तवान्। ततः मनसि भगवतः जगन्नाथस्य अपारकृपां धारयामास।

**बोधप्रश्नः**

१. विष्णोः सान्निध्यं कः प्राप्तवान्?

२. विद्यापतिः कः?

## विद्यापतिना पुरुषोत्तमक्षेत्रस्य विवरणप्रदानम्

राजा इन्द्रद्युम्नः विद्यापतिं प्रति सकलं रहस्यं विधिवत् परिपप्रच्छ। ततः सः विद्यापतिः तत्र घटितान् सर्वान् विषयान् प्रतिपादयामास। पुरुषोत्तमक्षेत्रं सर्वेषु क्षेत्रेषु सर्वतन्त्रस्वतन्त्रस्थानं स्वीकरोति। सकलानां तीर्थानां मूर्धन्यरूपेण क्षेत्रमिदं क्षितितले रराजते। विद्यापतिः प्रस्तौति यत् यदा सः पुरुषोत्तमक्षेत्रं प्रति गतवान् तत्र सायं समये आकाशात् पुष्पवृष्टिः जाता। सर्वे च देवाः साक्षात् देवाधिदेवस्य पुरुषोत्तमस्य दर्शनार्थं समीहन्ते। तदानीं नीलगिरिपर्वते सुशीतलवायुः प्रवहन् आसीत्। आकाशमार्गात् वाद्यध्वनेः निक्वणः अजायत। देवाः नीलमाधवस्य प्रीतये विविधमुपचारम् अकुर्वन्। तदुपचारः मनुष्याणां कृते अत्यन्तं दुर्लभो विद्यते। जगन्नाथस्य विविधाराधना तत्र अभूत्। तदानीं शवरराजः विश्वावसुः विविधानि भोज्यद्रव्याणि तथा भगवतः अङ्गरागस्वरूपां मालामेतां मह्यं ददौ इति विद्यापतिः अवादीत्। एषा माला कदाचिदपि म्लाना न भवति। अस्याः मूल्यं न कश्चित् निरूपयितुं शक्नोति। एषा  माला निर्धनतां तथा राक्षसपिशाचादीनां निधने अपि समर्था भविष्यति। यस्य पुरुषोत्तमक्षेत्रस्य दर्शनं मानवानां कृते सुचारुरूपेण कर्तुं नयनमपि असमर्थं विद्यते तस्य क्षेत्रस्य गारिमा को वा वक्तुं शक्नुयात्। उत्कलदेशस्य पुरुषोत्तमक्षेत्रस्य चतुस्त्रसु दिक्षु पर्वनकाननानि विद्यन्ते, तत्र इदं पुरुषोत्तमक्षेत्रं नाभितुल्यं नीलगिरिपर्वते सुशोभते। अस्य पुरुषोत्तमक्षेत्रस्य तटवर्त्ती समुद्रः वालुकाराशौ परिपूर्णो विद्यते। अस्मिन् नीलगिरिपर्वते विशालवटवृक्षः राजते। कल्पान्तं यावत् सःवृक्षः तिष्ठति इति जनश्रुतिः विद्यते। एकक्रोशं परिमितं विना पुष्पफलेन सः वृक्षः केवलं बहुतरपल्लवैः आच्छादितो विद्यते। अस्य अधोभागे छायायाः किमपि परिवर्त्तनं न भवति। वृक्षस्य पृष्ठभागे रोहिणकुण्डः विराजते। अस्य कुण्डस्य पावच्छादयः सर्वे नीलकान्तमणिना संयोजिताः विद्यन्ते। कुण्डः सर्वेषां जनानां पापहारको भवति। पूर्ववेदिकामध्यभागे देवचक्रः गदाधरः विराजते। तस्य मूर्त्तिः इन्द्रनीलमणिमयो वर्तते। अस्य परिमाणः एकाशीत्यङ्गुलिः। तदुपरि भगवान् तिष्ठति, यस्य भगवतः ललाटं चन्द्रमातुल्यं भवति। तस्य मुखदर्शनेन त्रितापानां हरणं भवति। भगवतः नाशिकाद्वयं तिलपुष्पमिव सुशोभते। भगवतः सर्वाङ्गं वर्णयित्वा सः विद्यापतिः इन्द्रद्युम्नस्य सविधे विस्तरेण सर्वं प्रतिपादयामास।

**बोधप्रश्न:**

१. पुरुषोत्तमक्षेत्रं कुत्र विद्यते ?

२. क: भगवत: सर्वाङ्गवर्णनं कृतवान् ?

## भगवत: शोभावर्णनम्

विद्यापति: पुरुषोत्तमक्षेत्रस्य सौन्दर्यं तथा विविधानां काननवृक्षाणां वर्णनं कृत्वा तत: भगवत: शोभां वर्णयामास। तत्र भगवान् साक्षात् विष्णो: स्वरूपभूतो नीलमाधव: शवरै: पूजितो विद्यते। तस्य च प्रभो: वक्षस्थले सुमनोहरनिर्मलहार: शोभते। कण्ठप्रदेशे कौस्तुभमणिस्तथा तत्र चतुर्द्दशभुवनमूर्त्ति: प्रतिविम्विता भवति। निम्नभागे नाभिप्रदेशे सूक्ष्मरोमावली सुशोभते। तत्र श्रीजगन्नाथ: स्थाणुरूपेण अचलो भूत्वा तिष्ठति। उत्तमरत्नमयकाञ्चीदाममुक्तानिर्मिताकङ्कणी सुशोभते। भगवान् पीतवसनं परिधृतवान्, तथा जघनं यावत् मुक्तामाला लम्विता जाता। मनोहरजानुयुगलं स्तम्भसदृशं विराजते। यत् मोक्षद्वारस्य मङ्गलतोरणरूपेण प्रतीयते। प्रभो: शरीरं हारकङ्कणकेयुरमुकुटाद्यलङ्कारेषु सुसज्जितो भूत्वा सूर्यसमानं प्रतिभाति। एवं रूपेण चतुर्दिगमालोकितं कृत्वा नीलगिरिपर्वतस्य उपरि तिष्ठन् आसीत्। भगवत: वामपार्श्वे लक्ष्मी: सदासर्वदा वर्तते। सा च लक्ष्मी: त्रिभुवनलावण्यस्य आधारभूता विद्यते, या विविधालङ्कारै: सुसज्जिता भूत्वा प्रभो: वामपार्श्वे अस्ति। जगत: पितरौ तत्र तृष्णीभावं स्वीकृत्य सर्वेषां मङ्गलाय तिष्ठति। भगवत: पश्चात् भागे अनन्तनाग: छत्राकारं कृत्वा विराजते। भगवत: सम्मुखे सुदर्शनं तथा तस्य पृष्ठत: श्रीगरुड: नित्यमास्ते। य: इहजन्मनि अथवा पूर्वजन्मनि सञ्चितपुण्यवलेन सत्कर्म आचरति स: एव भगवत: दर्शनं कर्त्तुं शक्नोति। परन्तु तीर्थदानतपस्याव्रत-वेदाध्ययनादि कृत्वा अपि न कश्चित् तस्य दर्शनं कर्त्तुं समर्थो भवति। ये जना: विष्णुमुर्त्तिस्वरूपभूतस्य नीलमाधवस्य दर्शनं करोति स: अवश्यं ऐहिकवन्धनात् विमुक्तो भूत्वा विष्णुलोकं प्रति अवश्यं याति। मानवा: तं पुरं प्रति गत्वा भगवत: दर्शनं कृत्वा विविधेषु विषयेषु पाण्डित्यं च अर्जनं कृत्वा विविधं सम्पत् अर्जयन्ति। तत्र ये शवरा: विराजन्ते तस्मात् एतादृशं सर्वमुपाख्यानं श्रुत्वा अहं धन्य: अभवम्। य: तं पुरं प्रति गत्वा भगवत: दर्शनं तथा सान्निध्यं प्राप्तवान् स: विष्णुलोकं प्रति याति। तत: एतादृशं सर्वं रहस्यं श्रुत्वा राजा इन्द्रद्युम्न: मनसि

स्थिरमकरोत् यत् तस्मिन् स्थाने पुरं निर्माय वसतिं कृत्वा जीवामि इति । ततः भगवतः प्रीतये सहस्रमश्वमेधं यागं समाप्य भगवतः नित्याराधनं करिष्यामि। भगवतः सर्वदा दर्शनं कृत्वा मनसि अशेषः आनन्दो भविष्यति इति अचिन्तयत्।

**बोधप्रश्नः**

१. श्रीवत्सचिह्न कस्य वर्तते ?

२. विद्यापतिः कं रहस्यं श्रावयामास ?

## सारांश:

अस्मिन् अध्याये भगवत्प्रेम्णः विशद् वर्णनं प्रस्तुतं विद्यते। अत्र भगवद्भक्तिरेव कथं संसारात् विमुक्त्यर्थं मुख्यसाधनरूपेण राराजते इति प्रतिपादितो वर्तते। पुनः अत्र भगवतः भक्तिविषये विविधा चर्चा प्रतिपादिता विद्यते। शवरराजस्य विश्वावसोः सम्वादः अध्यायस्य मार्मीकतां प्रतिपादयति। देवदुर्लभद्रव्याणि कस्यचित् एकस्य शवरस्य भोग्यरूपेण भगवतः प्रसादात् एव सम्भवति इति ज्ञात्वा अस्मिन् जन्मनि कृतं कर्म परित्यज्य भगवतः शरणमेकमात्रं काम्यं भवति इति प्रतिपाद्यते। ततः विद्यापतेः काननविहरणसमये विविधानां पुष्पाणां वृक्षाणां विषये नामानि श्रूयन्ते। अध्यायेऽस्मिन् पुरुषोत्तमक्षेत्रस्य सौन्दर्यं तथा सौकरं प्रतिपादितं विद्यते। अवन्तीं प्रति पुनः आगत्य सः विद्यापतिः सकलं रहस्यं सर्वेभ्यः अश्रावयत्। ततः इन्द्रद्युम्नस्य भगवन्तं प्रति अहैतुकी भक्तिः आगता इत्यस्मिन् विषये चर्चा विहिता वर्तते।

# आदर्शप्रश्ना:

## लघुत्तरीयप्रश्ना:

१. भगवत: लीलावर्णनम्।

२. विद्यापते: भगवद्दर्शनम्।

३. वटवृक्षस्य माहात्म्यम्।

## विश्लेषणात्मकप्रश्ना:

१. विद्यापते: पुरुषोत्तमक्षेत्रविवरणं निरूपयत।

२. शवरराजस्य विद्यापतिं प्रति अभ्यर्थनां स्पष्टयत।

## निवन्धात्मकप्रश्ना:

१. विश्वावसुविद्यपतिसम्वादं लिखत।

२. पुरुषोत्तमक्षेत्रस्य शोभां स्पष्टयत।

## एकाङ्कप्रश्ना:

१. शवरराजस्य नाम किम्?

२. पौरहित: क:?

३. वेदा: कस्य स्वरूपभूता: विद्यन्ते?

४. क: पर्वत: दुर्गम: आसीत्?

५. पुरुषोत्तमक्षेत्रस्य अपरं नाम किम्?

६. देवदुर्लभानि द्रव्याणि क: वुभुजे?

७. विमला कस्य रक्षणं करोति?

८. पीतवसनं क: परिदधाति?

९. देवा: कस्य दर्शनार्थं सायंकाले समागता: आसन्?

१०. कस्मात् प्रदेशात् विद्यापति: आगतवान्?

११. विद्यापतिं क: राजा पुरुषोत्तमक्षेत्रं प्रति प्रेषयामास?

१२. भगवतः दर्शनं पुरुषोत्तमक्षेत्रे कः प्राप्तवान्?

१३. नीलमाधवः कस्य स्वरूपभूतो विद्यते?

## उत्तराणि

१. विश्वावसुः २. विद्यापतिः ३. विष्णोः ४. नीलगिरिः ५. शङ्खक्षेत्रं ६. विद्यापतिः ७. नीलमाधवस्य ८. विष्णुः ९. विष्णोः १०. अवन्तीतः ११. इन्द्रद्युम्नः १२. विद्यापतिः १३. विष्णोः

# चतुर्थोऽध्यायः

## प्रस्तावना

चतुर्थोऽध्यायेऽस्मिन् विविधानि भक्तितत्त्वानि प्रतिपाद्यन्ते। यानि तत्त्वानि पाठकानामन्तःकरणात् ग्लानिं समूलरूपेण ध्वंसं करिष्यति। अस्मिन् प्रपञ्चे विष्णोः भक्तिरेव सर्वासु श्रेष्ठा इति प्रतिपाद्यते। भगवतः नारदमुखेन इन्द्रद्युम्नं प्रति विविधसम्वादप्रदानं पुरःसरं भक्तानां भक्तितत्त्वानां व्याख्यानं समेषां कृते प्रतिपादनं क्रियते। भगवतः साक्षात् स्वरूपं, विष्णुभक्तानां लक्षणं तथा भक्तेः विविधवर्णनं प्रतिपाद्यते। इमां भक्तिं सर्वे सिद्धाः मुनयः शतजन्मनः पुण्यवलेन प्राप्नुवन्ति। भगवति अनुरागः सर्वेषां मनसि नागच्छति। परन्तु यस्य पूर्वजन्मनः सुकृतं विद्यते सः भगवतः अनुग्रहेण भक्तिरूपं समुद्रमधिगच्छति। भगवद्भक्तस्य भिन्नं भिन्नं लक्षणमत्र प्रतिपाद्यते। सात्त्विकराजसिकतामसिकादीनां त्रिविधभक्तानां विषये विचारः विहितो वर्तते।

## उद्देश्यम्

अस्मिन् अध्याये सर्वेऽपि अध्येतारः एतान् अंशान् पठिष्यन्ति।

- **नारदेन्द्रद्युम्नसम्वादः**
- **विष्णुभक्तिलक्षणवर्णनम्**
- **इन्द्रद्युम्नस्य नारदाय अभ्यर्थना**
- **इन्द्रद्युम्नस्य पुरुषोत्तमक्षेत्रं प्रति गमनम्**

## नारदेन्द्रद्युम्नसम्वादः

विधिवत् इन्द्रद्युम्नः भगवतः विविधार्च्चनादिकं करिष्यामि इति मनसि मुहुर्मुहुः चिन्तयामास। तपः आचरणं कृत्वा कठोरव्रतपालनपुरःसरं शान्तिं प्राप्स्यामि इति । ततः देवर्षिः नारदः तस्मिन् स्थाने उपस्थितः जातः। नरपतिः तत्र भगवतः नारदस्य आगमनं दृष्ट्वा तस्य देवस्य सत्कारं चकार। भगवतः नारदस्य आगमनं दृष्ट्वा स्वकार्यस्य कदाचित् सिद्धिर्भविष्यति इति विचिन्त्य प्रसन्नो बभूव। नारदस्य अर्चनं कृत्वा विविधनैवेद्यादि समर्प्य अर्घ्यं समर्पयामास। तं नारदं सभासने उपाविश्य तं प्रति राजा इन्द्रद्युम्नः प्रोवाच पूर्वजन्मनः तपः कारणादेव भगवतः दर्शनं भवति। अद्यैव इहजन्मकृतानां दानदक्षिणाजपहोमाध्ययनतपस्यादीनां फलं प्राप्तम्। का वा आज्ञा राज्ञः कृते अस्ति इति राजा तं मुनिश्रेष्ठं नारदं प्रति पप्रच्छ। तस्य सत्काराभिवादने सन्तुष्टः सन् वेदपतिः नारदः प्रीतो भूत्वा सस्मितवदनेन तस्य राज्ञः उपरि देवसिद्धगन्धर्वादयः सर्वे प्रसन्ना इति अवादीत्। वदरिकाश्रमे भगवतः दर्शनार्थं समागतः नारदः इन्द्रद्युम्नस्य अहैतुकीं श्रद्धां दृष्ट्वा तं प्रति समायातः। सहस्रजन्मनः तपस्यायाः प्रभावादेव भगवन्तं नारायणं प्रति भक्तिः जायते। परन्तु अहैतुकी भक्तिमाध्यमेन इन्द्रद्युम्नः तस्य फलं पपौ। भगवतः विष्णोः भक्तिः चतुर्वर्गफलप्राप्तिनिमित्तं भवति। एषा पञ्चक्लेशान् विनश्यति। अनाद्यविद्यायाः विनाशाय एकमात्रं विष्णुभक्तः एव समर्थः। संसारस्य दुःखतापशीतोष्णादि द्वन्देषु विमुक्तये केवलमेकमात्रं साधनी भवति विष्णुभक्तिः। यः जनः विष्णोः परमभक्तः सः कदाचित् दुःखं न प्राप्नोति। ते एव मुक्तिपथेन ब्रह्मलोके विष्णुलोके स्वर्गलोके च महीयन्ते। विष्णुभक्तिमाध्यमेन कायिकवाचिकमानसिकं त्रितापं नश्यति। प्रयागदिषु स्नानं तपः शताश्वमेधयागः राजसूययागः तथा आजीवनं सत्यपथि गमने अपि कोटिशः सद्गुणाः एकत्रीकृत्य कदाचिदपि विष्णुभक्तात् एकांशेन तुल्यं न भवति।

**बोधप्रश्नः**

१. परमविष्णुभक्तःकः ?

२. नारदः ब्रह्मणः कीदृशः पुत्रो वर्तते ?

३. शताश्वमेधयागतुल्यं किं भवति ?

## विष्णुभक्तिलक्षणवर्णनम्

राजा इन्द्रद्युम्नः नारदस्य मुखपद्मात् एतादृशं वचनं श्रुत्वा मनसि आनन्दमनुभूतवान्। विष्णुभक्तेः माहात्म्यं श्रुत्वा धन्यो बभूव। ततः पुनः राजा तं मुनिसत्तमं विष्णुभक्तिलक्षणं किमिति पप्रच्छ। नारदः राज्ञः वचनं श्रुत्वा आनन्देन अपि भगवद्भक्तस्य भक्तेश्च लक्षणं प्रतिपादयामास। दीनदुःखदावाग्नौ यः प्रपीडितो भवति तस्य एकमात्रं शरणं भवति विष्णोः चिन्तनमननध्यानं च। संसारस्य दुःखादेव विष्णुभक्तिः सर्वान् पापान् विनश्य पुण्यं प्रददाति। अतः विष्णोः भक्तिः त्रिविधा भवति। कामक्रोधादिषु मग्नाः सन्तः दोषयुक्तपदार्थं स्वीकृत्य लाभाभिचारनिमित्तं या भक्तिः विधीयते सा तामसी भक्तिरिति ज्ञायते। द्वितीये परलोके मङ्गलार्थं ऐहिकयशप्राप्तये या भक्ति क्रियमाणा विद्यते सा राजसी भक्तिरिति प्रोच्यते। परन्तु आत्मज्ञानानुरक्तो भूत्वा विविधानां वर्णाश्रमाणां ग्रहणं पूर्वकं सर्वान् पदार्थान् विनाशशीलमिति विचिन्त्य या भक्तिः क्रियते सा सात्त्विकी भक्तिः कथ्यते। एतदतिरिच्य निर्गुणभक्तिः एतस्मात् भिन्ना काचित् विद्यते या भगवतः भिन्नं न किमपि विद्यते, शरीरादि सुखभोग्यं केवलमैहिकजं भवति इति विचिन्त्य ज्ञानेन प्रेम्णा या भक्तिः क्रियते सा अद्वैतनाम्नी सुदुर्लभा भक्तिः भवति। एतासु त्रिविधेषु सर्वादौ यदुक्ताः सा सगुणभक्तिः तथा अन्तिमाभक्तिः निर्गुणाभक्तिः उच्यते। सात्त्विकभक्त्या ब्रह्मलोकः राजसभक्त्या इन्द्रलोकः तथा तामसभक्त्या पितृलोकः प्राप्यते। क्रमेण भक्तिमाध्यमेन मुक्तिः अवश्यं लभ्यते। परन्तु विष्णुभक्तिहीनस्य वेदस्मृतिक्रियाकलापतीर्थयात्रादानधर्मव्रतादीनि सर्वाणि व्यभिचारसदृशं भवति। अल्पभाग्येन पुरुषस्य विष्णुभक्तिः न जायते। या विद्या भगवतः विषये ज्ञातुं प्रेरयति सा विद्या एव विद्या इति श्लाघ्यते। पुनः यत् कर्म भगवतः प्रीतये भवति तत् अशुभस्य नाशं करोति। विष्णुभक्तस्य पदरजोभिः सचराचरजगत् पवित्रं भवति। विष्णुभक्तस्तथा साक्षात् विष्णुः एव संसारे एकः विषयः तदतिरिच्य नान्यत् किमपि संसारे विद्यते। एतस्याः भक्त्याः लक्षणवर्णनानन्तरं नारदः भक्तस्य लक्षणं प्रोवाच। वासुदेवस्य भक्ताः प्रशान्तचित्ताः जितेन्द्रियाः कायमनवचोभिः शुद्धान्तःकरणाः भवन्ति। अन्येभ्यः हिंसां तथा दुर्गुणभावं प्रति विष्णुभक्तानां प्रवृत्तिर्नभवति। विमत्स्यराः भूत्वा सर्वेषु द्रव्येषु विष्णोः सत्तां सर्वदा परिपश्यन्ति। तथा अन्येषामुत्कर्षं कार्यं स्वस्य महोत्सवं इति चिन्तयन्ति। दीनजनानां प्रति आदरः तथा देवपूजायां श्रद्धा तेषां मनसि सदा भवति। सांसारिकविषयसुखं प्रति वैतृष्णां प्रकाशयन्ति। विष्णुभक्ताः सदासर्वदा विष्णोः गुणकीर्त्तने अनुरक्ताः तथा पितृतर्पणे निमग्नाः नित्यकर्त्तव्यपरायणाः भवन्ति। कृत्स्नं जगत् विष्णोः स्वरूपं तथा माया इति

चिन्तयन्ति। मनसि भगवति प्रगाढ़: विश्वास: तेषां भवति, पुन: सेव्यसेवककारणकार्यरूपेण आत्मानं विष्णुभक्त: चिन्तयति। अन्यत् सर्वं तुच्छं तृणवत् मन्यमाना: सन्त: भगवत: गुणसङ्कीर्त्तनं कृत्वा भगवद्भक्त्या निमग्ना: भवन्ति। परेषां दु:खे दुखिन: तथा सुखे सुखिन: भूत्वा परद्रव्याणि पाषाणवत् विचिन्तयन्ति।

ये जना: भगवत: पादपद्मे मन: संस्थाप्य एकाग्रचित्तेन आत्मसमर्पणपूर्वकं विष्णो: मननध्यानार्चनं कृत्वा ऐहिकसुखं त्यक्त्वा नित्याराधनं कुर्वन्त: तल्लीना: भवन्ति, ते परमवैष्णवा: इति प्रसिद्धा: भवन्ति।

**बोधप्रश्न:**

१. तामसभक्त: क: ?

२. के मुक्तिं प्राप्नुवन्ति ?

## इन्द्रद्युम्नस्य नारदाय अभ्यर्थना

मुनिपुङ्गव: देवर्षिनारद: सकलं रहस्यं इन्द्रद्युम्नं श्रावयामास। विष्णुभक्तस्य लक्षणं तथा विविधानां भक्तिप्रकाराणां वर्णनं कृत्वा नारद: इन्द्रद्युम्नं प्रति अनुग्रहं कृतवान्। नारदस्य मुखकमलात् सर्वं श्रुत्वा राजा धन्यो बभूव। पूर्वं यत् श्रुतमासीत् यत् सत्सङ्गमाध्यमेन भगवत्प्राप्तिरूपं फलं लभ्यते। परन्तु सौभाग्यकारणादेव नारदमुने: मुखपद्मात् सकलं रहस्यं राजा ज्ञातवान्। अत: एतत् विचिन्त्य राजा नारदम् अभ्यर्थनां कृतवान्। तत: इन्द्रद्युम्न: साक्षात् नारदं ब्रबीति यत् भवत: दर्शनं तथा सङ्गं लब्ध्वा जीवनं सार्थकमभूत्। भगवत: सान्निध्यं लब्ध्वा इन्द्रद्युम्नस्य आन्तरिकान्धकार: नष्टो जात:। एतादृशस्य भगवत: विविधानि स्वरूपाणि श्रुत्वा स: आत्मानमपि धन्यं मनुते। तदथं ब्रह्माण्डस्य सकलरहस्यस्य य: ज्ञाता वर्तते, तेन नारदेन सह पुरुषोत्तमं क्षेत्रं प्रति गन्तुम् इयेष। तस्य वचनं श्रुत्वा महर्षि: नारदोऽपि सहमतो बभूव। सकलानां तीर्थानां तथा पुरुषोत्तमक्षेत्रस्य माहात्म्यं नारदमतिरिच्य न कोऽपि वक्तुं शक्नोति। अस्मिन् क्षेत्रे विद्यमानानां तीर्थानां शक्तिपीठानां सकलं रहस्यं नारद: श्रावयिष्यति इति प्रोवाच। नारद: अपि इन्द्रद्युम्नेन सह पुरुषोत्तमक्षेत्रं प्रति गन्तुमुद्यत: अभूत्। स: नारद: राजानं सकलानां तीर्थानां दर्शनं कारयिष्यति इति प्रत्युत्तरितवान्। सर्वेषामनुग्रहार्थं भगवान् लक्ष्मीकान्त: तत्र चतुर्धामूर्त्तिं धारणं कृत्वा अवस्थानमकरोत्। यस्य दर्शनानन्तरं सकलपापानां विनाशो भवति।

**बोधप्रश्न:**

१. इन्द्रद्युम्नं प्रति क: आजगाम ?

२. भगवत्प्राप्ते: साधनं किम् ?

## इन्द्रद्युम्नस्य पुरुषोत्तमक्षेत्रं प्रति गमनम्

राजा इन्द्रद्युम्न: नारदेन सह गन्तुं मनसि विचारं कृत्वा सर्वेभ्य: जनेभ्य: आहूय जनादेशं चकार। अस्मिन् राज्ये ये ये निवसन्ति ते सर्वेऽपि पुरुषोत्तमक्षेत्रं प्रति गन्तुम् उद्यता: भवन्तु। अस्मिन् राज्ये ये ब्राह्मणा: सन्ति ते तत्रापि गत्वा यागानुष्ठानादीनि कर्माणि कुर्वन्तु। रथै: गजै: तुरङ्गैश्च सह पदातिभि: सह सर्वे ब्राह्मणा: आग्निहोत्रिण: व्रजन्तु। वणिज: सर्वे भाण्डैस्सह तथा पण्यजीविन: सपण्या तत्र व्रजन्तु। सर्वेऽपि ज्योतिर्विद: नृत्यविद: दण्डनीतौ प्रवीणका: सुबुद्धय: नटगणा: नृत्यगीतवाद्यादिषु पारङ्गता: च तत्र गत्वा स्वीयकार्यं यथेदं कुर्वन्तु इति राजा प्रोवाच। ये च जना: शास्त्रचर्चायां समयं यापयन्ति तथा अन्यस्य द्रव्याणि ये च अपहृत्य विभ्रमन्ति ते सर्वेऽपि पापात् विमुक्त्यर्थं गच्छेयु:। द्युतकारपुंश्चालीवेश्याधीनविटकृषकगोमेषादिपशुपालका: वानरव्याघ्रादिजन्तुरक्षका: विषवैद्यगणा: गोपाला: अश्वचरा: च सर्वे नीलाचलधाम प्रति गत्वा तिष्ठन्तु इति। तत: राजा दिव्यसिंहासने उपविश्य विविधै: ब्राह्मणै: श्रीसूक्तवह्निसूक्तदैवतपावमानादिसूक्तै: अभिषिक्तो भूत्वा तीर्थजलै: च गन्धोदकादिभि: सेवनपुर:सरम् अनल इव देदीप्यमान: अभूत्। तत: शुक्लवस्त्रपरिधानपूर्वकं गणदेवानां होमादिकर्म समाप्य पुरुषोत्तमक्षेत्रं प्रति गन्तुम् उद्यतो बभूव। राजा द्वाभ्यां हस्ताभ्यां केयुराङ्गदमुद्रिका: धृत्वा स्वर्णसूत्रं धारयामास। विविधानां विघ्नोपाशनमन्त्रै: अभिरक्षित: सन् माधवं हृदि स्मरन् दक्षिणचरणं विक्षेपं कृतवान्। नारदमुनि: अस्य च राज्ञ: पुरत: यात्रामकरोत्। पूर्वभागे अग्निहोत्रं स्वीकृत्य परिचारकै: प्रदर्शितपथि यात्राया: प्रारम्भ: चकार। दक्षिणस्यां दिशि श्वेतवस्त्रं परिधृत्य ब्राह्मणा: राज्ञ: पुरत: पुष्पवर्षणं कृत्वा मङ्गलसूक्तं पाठं कृत्वा आशीर्वादप्रदानपूर्वकं गमनं कुर्वन्त: सन्ति। शुभसूचकानां वस्तूनां धारणपूर्वकं दर्शनपुर:सरं च पूर्णकुम्भादि माङ्गलिकद्रव्याणि दर्शनं कृत्वा यात्रां कृतवान्। एकस्मिन् समये शतशङ्खध्वनि: शुश्राव।

सर्वेऽपि ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च स्वीयवस्तूनि स्वीकृत्य यात्राभिमुखे प्रतस्थिरे। पुनः भृत्याः आतपनिवारणाय श्वेतछत्रधारणपूर्वकं गन्तुमुद्यताः अभूवन्। एकस्मिन् समये शङ्खध्वनिना अवन्ती मुखरिता बभूव। ततः पुरोहितः भगवतः अङ्गात् दिव्यशुभ्रां स्रजं स्वीकृत्य इन्द्रद्युम्नस्य कण्ठप्रदेशे आसञ्जयामास। ततः राजा इन्द्रद्युम्नः मालापरिधानपूर्वकं सुगन्धितद्रव्याणि लेपनं कृत्वा नीराजयामास। वायुरिव गन्तुमुद्यताः दशतुरङ्गसंयोजिते रथे नारदेन सह समाविशत्। ततः ढक्कामृदङ्गपणवगोमुखशङ्खप्रभृतिभिः वाद्यैः तत् स्थानं शोभनमभूत्। ततः इन्द्रद्युम्नेन सह सर्वे रथारूढ़ाः सन्तः प्रचकासिरे। अन्ये राज्यवासिनः सर्वे केचन अश्वारूढ़ाः गजारूढ़ाः तथा उष्ट्रारूढ़ाः सन्तः यात्रां कृतवन्तः। सर्वे विविधानि द्रव्याणि स्वीकृत्य प्रतस्थिरे, केचन ब्राह्मणाः पूजायाः उपकरणानि केचन काष्ठादीन् पदार्थान् नीतवन्तः। सर्वे दुर्गमारण्यमध्ये शङ्खध्वनिं कृत्वा जग्मुः। ये जनाः मार्गं जानन्ति ते सर्वे अभिज्ञाः राज्ञः मार्गप्रदर्शनं चक्रुः। यात्रासमये अनुकूलवायुः ववार। भिन्नं भिन्नं स्थलम् अरण्यानि दृष्ट्वा राजा प्रसन्नमनसा मार्गे गतवान्। नीलाचलधाम प्रति गमनसमये उत्कलदेशस्य सीमां प्राप्य मार्गस्थां चण्डिकां ददृशुः। नारदस्य आज्ञानुसारं सः राजा रथात् अवतीर्य विनयेन साष्टाङ्गं प्रणिपातं चकार। सर्वे ब्रह्माविष्णुमहेश्वरादयः अस्याः देव्याः स्मरणं निरन्तरं कार्यसाधनार्थं कुर्वन्ति। ततः यथा नीलाचलधाम्नि भगवतः दर्शनं कर्तुं शक्यते तथा अनुग्रहं स्वीकृत्य सः राजा तस्मात् अग्रे प्रस्थितो बभूव। ततः धातुकन्दरवनम् अतिक्रमणं कृत्वा चित्रोत्पलायाः महानद्याः तीरे सर्वे अवतीर्णाः आसन्। तत्र राजा पुरोहित्यैः सह सांयकालस्य नित्यकार्यं समापनपूर्वकं स्नानपितृतर्पणदेवपूजनं यथाविधि कृतवान्। ततः नारदेन सह सर्वे भोज्यद्रव्याणि भुञ्जते स्म। ततः सर्वे भृत्याः अनुचराः गद्यपद्यमयेन राज्ञः स्तुतिगानं चक्रुः। ततः उत्कलाधिपस्य सत्कारं कृत्वा तथा अभिमन्त्रणं पूर्वकं सर्वं रहस्यं राजानं प्रति कथयामास।

**बोधप्रश्नः**

१. इन्द्रद्युम्नेन सह के पुरुषोत्तमक्षेत्रं प्रति गच्छन्तः आसन्?

२. राजा इन्द्रद्युम्नः मार्गे कस्याः देव्याः दर्शनमकरोत्?

३. कान् राजा सम्बोधयामास?

## सारांश:

साक्षात् ब्रह्मण: आदेशानुक्रमे नारद: इन्द्रद्युम्नं प्रति गत्वा सकलानि रहस्यानि प्रतिपादयामास। तत्र इन्द्रद्युम्नस्य विविधानां पश्नानां नारद: प्रत्त्युतरं ददौ। तत्र भगवत: भक्ति: एव अस्य संसारस्य तारणे मुख्या भवति इति नारद: ब्रबीति। भक्ते: परमं साधनं प्रतिपाद्य सर्वेषु श्रेष्ठतरेषु श्रेष्ठो भवति विष्णुभक्ति: इति विचार: प्रस्तुत:। अध्यायेऽस्मिन् यद्यपि भक्ते: माहात्म्यं प्रतिपदितं विद्यते, तथापि नारद: साक्षात् अस्य भक्तस्य विविधानि लक्षणानि वर्णयति। भक्तस्य गुणा: कार्याणि च प्रतिपाद्य क: भक्त: श्रेष्ठ: इत्यस्मिन् सन्दर्भे महान् विचार: अत्र द्रष्टुं शक्यते। भगवत: विष्णो: महिमा तथा नारदस्य मुखात् भक्तितत्त्वं श्रुत्वा आनन्दित: राजा तेन सह पुरुषोत्तमक्षेत्रं प्रति गन्तु मनसि चिन्तयामास।

# आदर्शप्रश्नाः

## लघुत्तरीयप्रश्नाः

१. विष्णुभक्तिलक्षणम्।

२. भक्तेः फलवर्णनम्।

३. भक्तेः माहात्म्यम्।

## विश्लेषणात्मकप्रश्नाः

१. पुरुषोत्तमक्षेत्रं प्रति गन्तुं विचारं प्रकटयत।

२. नारदाय इन्द्रद्युम्नस्य अभ्यर्थना लिखत।

३. पुरुषोत्तमक्षेत्रस्य वर्णनं कुरुत।

## निवन्धात्मकप्रश्नाः

१. विष्णुभक्तेः स्वरूपं विवेचयत।

२. नारदेन्द्रद्युम्नसम्वादं प्रतिपादयत।

## एकाङ्कप्रश्नाः

१. देवर्षिणां मध्ये भगवान् कः विद्यते ?

२. कः सहस्राश्वमेधयागं कर्तुम् इयेष ?

३. कस्य क्षेत्रस्य माहात्म्यं सर्वतोधिकं विद्यते ?

४. कल्पान्तं यावत् भगवान् कुत्र तिष्ठति ?

५. भगवतः नाभिकमलात् कः जज्ञे ?

६. मुनिपुङ्गवः कः ?

७. परिचारकाः कुत्र आसन् ?

८. कस्य यात्रानिमित्तं माङ्गलिकवस्तूनां स्थापनमभूत् ?

९. ब्रह्मणः मानसपुत्रः कः ?

१०. सर्वेषां देवानामारध्यः देवः कः ?

११. पुरुषोत्तमक्षेत्रस्य माहात्म्यं कस्मिन् पुराणे विशेषतया वर्णितं विद्यते ?

१२. कः भगवतः नीलमाधवस्य दर्शनं कृत्वा आगतवान् ?

## उत्तराणि

१. नारदः २. इन्द्रद्युम्नः ३. पुरुषोत्तमक्षेत्रस्य ४. पुरुषोत्तमक्षेत्रे ५. ब्रह्मा ६. नारदः ७. पूर्वभागे ८. इन्द्रद्युम्नस्य ९. नारदः १०. विष्णुः ११. स्कन्धपुराणे १२. विद्यापतिः

# पञ्चमोऽध्यायः

## प्रस्तावना

पुरुषोत्तमक्षेत्रस्य माहात्म्यं वर्णयितुं यद्यपि न कोऽपि समर्थो विद्यते तथापि किञ्चिदेव कुत्रचित् महत्त्वं स्थलविशेषेषु दरीदृश्यते। अस्य स्कन्धमहापुराणस्य विष्णुखण्डे यथा पुरुषोत्तमक्षेत्रस्य वर्णनं समुपलभ्यते तथा न अन्यत्र कुत्रचित् दृश्यते। राज्ञः इन्द्रद्युम्नस्य सकलचरितवर्णनं पुरःसरं विविधानां क्षेत्राणां वर्णनमस्य अध्यायस्य विषयो वर्तते। राज्ञः इन्द्रद्युम्नस्य गमनमार्गे विविधानि नगरपर्वतदुर्गकाननादीनि गतानि विद्यन्ते। नारदः सहर्षं सर्वं रहस्यं इन्द्रद्युम्नं प्रति बोधयामास। ततः प्रसङ्गवशात् एकाम्रकाननक्षेत्रं प्रति गमनसमये घण्टानादादि शब्दः सर्वैः श्रुतः। तस्मिन् विषये अस्मिन् अध्याये प्रतिपाद्यते।

## उद्देश्यम्

अस्मिन् अध्याये सर्वे पाठकाः एतान् सर्वान् विन्दून् वेदिष्यन्ति।

- **राज्ञः इन्द्रद्युम्नस्य एकाम्रकाननप्रवेशः**
- **एकाम्रकाननस्य माहात्म्यम्**
- **भगवतः कपोतेश्वरस्य माहात्म्यम्**
- **विल्वेश्वरस्य माहात्म्यम्**

## राज्ञः इन्द्रद्युम्नस्य एकाम्रकाननप्रवेशः

ब्रह्मर्षिनारदमुखात् विविधं रहस्यं श्रुत्वा राजा इन्द्रद्युम्नः आत्मनः बहुजन्मार्जितं पुण्यमिति चिन्तयामास। जन्मान्तरे कृतस्य कार्यस्य फलरूपेण साक्षात् ब्रह्मा कार्यसाधने सहायमकरोत्। यादृशः सहायः, कार्यं तादृशं सफलतामुपैति इति पूर्वं बृद्धानुशासनं विद्यते। इत्थं विचिन्त्य सः राजा इन्द्रद्युम्नः नारदस्य करं धृत्वा अन्तःपुरे आविवेशः। तं नारदमर्चयित्वा विधिवत् पर्य्यङ्के तेन सह अशेरत। ततः प्रभाते विविधैः उपचारै पूजयित्वा यात्रारम्भं कृत्वा महानदीं ततार। उड्रदेशाधिपतिः अस्य इन्द्रद्यम्नस्य यात्रायां सहायं चकार। किञ्चिद्दूरं गमनानन्तरं ते सर्वे गन्धावहानदीं पुनः प्राप्य वेगेन गमनं चक्रुः। तत्र शङ्खमृदङ्गमुरजचर्च्चरिकाहालादीनां शब्दं शुश्राव। तस्मात् कारणात् राजा इन्द्रद्यम्नः प्रीतो भूत्वा पुरुषोत्तमं क्षेत्रं कदाचित् प्राप्तं वा इति पप्रच्छ। परन्तुं सर्वज्ञानी नारदः तं राजानं इन्द्रद्यम्नम् अस्य वाद्यध्वनेः कारणभूतं रहस्यं श्रावयामास। पुरुषोत्तमक्षेत्रं सर्वेषु क्षेत्रेषु अत्यन्तं दुर्लभं वर्तते। सौभाग्यकारभणादेव विद्यापतिः भगवतः दर्शनं पपौ। परन्तु ये भक्तिहीनाः ते कदाचिदपि भगवतः दर्शनं न प्राप्तुं शक्नुवन्ति। तत् क्षेत्रं योजनत्रयमितोऽपि अवशिष्टमस्ति। इदं तु क्षेत्रम् एकाम्रकाननं नाम्ना प्रसिद्धं विद्यते। इदमेकाम्रकाननं भगवतः शिवस्य पुण्यस्थलमिति सुतरां ज्ञायते। असौ शिवः पुराकाले त्रिपुराशुरस्य दाहं चकार। अस्मिन् क्षेत्रे भगवतः शिवस्य पूजाविधानं क्रियते। तदर्थं पूजासमये शङ्खमृदङ्गादीनि विविधानि वाद्यवस्तूनि सुतरां कर्णपथि समायातानि भवन्ति। एतत् एकाम्रकाननस्य क्षेत्रं वर्तते इति नारदः राजानं इन्द्रद्यम्नं प्रबोधयामास।

**बोधप्रश्नः**

१. केन सह इन्द्रद्युम्नः समायातः ?

२. त्रिपुरासुरस्य हननं कः अकरोत्?

## एकाम्रकाननस्य माहात्म्यम्

राजा इन्द्रद्युम्नः नारदं प्रति विविधान् प्रश्नान् मध्ये पप्रच्छ। तस्य राज्ञः प्रश्नस्य उत्तरमपि नारदः प्रददाति। एकाम्रकानने प्राप्ते नरपतिः राजा इन्द्रद्युम्नः अस्य भगवतः एकाम्रकानने भगवतः स्थितेः रहस्यं

पप्रच्छ। एकेन शरेण यः त्रिपुरासुरं ददाह, सः महादेवः शिवः किमर्थमत्र निवसति? ततः नारदः तस्मात् पूर्वजन्मनः कथामेकां श्रावयामास। कदाचित् भगवान् शिवः हिमगिरिशिखरे ब्रह्मचारीरूपं धृत्वा तपः आचरितुं प्राविवेश। ततः भगवान् शिवः पार्वत्या सह विवाहं कृत्वा यौवनोन्मत्तया रुचिरया उपरेमे, तथा देवाकाङ्क्षितान् विषयभोगान् वुभुजे। यदा गौरी वासभवनात् बहिरागता, तदानीं तस्याः माता तथा अन्यः कुलस्त्रीगणः समवेतो भूत्वा पार्वतीं सम्बोधयामास। बहुतपः आचरणं कृत्वाऽपि किमर्थमेतादृशं बृद्धं वरं ययाच इत्यपि अवोचत्। कीदृशाः गुणाः अस्मिन् शिवे दृष्टाः इति अपि सर्वाः पप्रच्छ? एतादृशं भर्त्तृनिन्दितं वचनं श्रुत्वा पार्वती किमपि नोक्त्वा गिरिकन्दरं प्रति प्राविवेश। ततः पार्वती शिवं प्रति अस्मिन् गिरिगृहे स्थातुं न किमपि प्रयोजनं वर्तते इति प्रोवाच । अतः त्रिलोकनाथस्य कृते अस्मिन् गिरिगृहे वासः निन्दनीयो विद्यते। पार्वत्याः एतादृशं वचनं श्रुत्वा देवाधिदेवः महादेवः शिवः वृषारुढ़ो भूत्वा मध्यदेशं प्रति जगाम। क्रमशः प्रयागमतिरिच्य गौर्य्याः वासनिमित्तं गङ्गायाः टतवर्त्ती उत्तरस्यां दिशि वाराणसीं नगरीं प्रतिष्ठापयामास। इयं पुरी पञ्चक्रोशं परिमितं विद्यते। रमणीयेन प्रासादेन शतशताट्टालिकायां, विविधेषु तीर्थेषु मानवेषु च परिपूर्णाः भूत्वा इयं नगरी सुशोभिता जाता बभूव। साक्षात् देवशिल्पी विश्वकर्मा महादेवस्य आज्ञानुसारं शुभ्रतायां नगरीमिमां रचनां चकार। ततः पार्वत्या सह महादेवः शिवः तस्मिन् पुरे शुद्धाट्टालिकायां विचचार। सा वाराणसी सुवर्णनिर्मित्तप्राचीरं तथा अट्टालिकायां परिपूर्णा आसीत्। इदं वाराणसीक्षेत्रमपि प्रसिद्धेषु तीर्थेषु सर्वश्रेष्ठं क्षेत्रं वर्तते। ततः बहुसमयानन्तरं पार्वत्या सह महादेवः कैलासपर्वताभिमुखे यात्रां चकार। तस्मात् कालात् एकाधिकः नरपतिः तां नगरीं शशास। द्वापरयुगप्राप्ते काशीराजः तस्मिन् पुरे राजत्वमकरोत्। सः भगवन्तं शिवं तपस्यां कृत्वा तोषयामास। ततः वररूपेण सकलासु विद्यासु अस्त्रशस्त्रेषु पारङ्गतो भूत्वा श्रीकृष्णजरासन्धादीन् यथा पराजयं कर्त्तुं क्षमता स्यात् तथा वरं ययाच। भगवान् शिवः अपि तस्मै तादृशं वाञ्छितं वरं दत्वा तुष्टाव। ततः सः स्वपराक्रमेण शङ्खचक्रधारीं श्रीकृष्णं युद्धस्थलं प्रति आह्वानं चकार। ततः सः अन्तर्यामी सकलं वृतान्तं ज्ञात्वा चक्रं प्रेषितवान्। सहस्रादित्यवर्चसयुक्तं सुदर्शनं चक्रं तस्य शिरच्छेदनमकरोत्, तथा पुरीं च ददाह। तदानीं क्रुद्धः महादेवः प्रमथगणं स्वीकृत्य युद्धनिमित्तं जगाम। ततः सुदर्शनचक्रं सर्वान् प्रमथगणान् हत्वा पाशुपतास्त्रमपि च्छिन्नमकरोत्। ततः महादेवः शिवः भगवतः श्रीकृष्णस्य आराधनां चकार। ततः क्रोधयुक्तेन भगवान् श्रीहरिः तं शङ्करं प्रबोधयामास। पुनः पुरुषोत्तमक्षेत्रं प्रति गन्तुं प्रेरयामास। एतत् क्षेत्रं दक्षिणसमुद्रस्थनीलपर्वते विराजते। एतत् क्षेत्रं

दशयोजनं विरजमण्डलं यावत् विस्तृतमस्ति। तथा क्रमशः चित्रोत्पलानदीं यावत् सर्वान् पावनं करोति। तत्र भगवान् लीलामयः नीलकान्तमणिमयरूपं धृत्वा नित्यं विराजते। तस्य पुरुषोत्तमक्षेत्रस्य उत्तरभागे एकाम्रकाननं विस्तृतं विद्यते। तत्र गत्वा पार्वत्या सह तिष्ठ इति प्रभुः आदिदेश। ब्रह्मा साक्षात् गत्वा कोटिलिङ्गानां स्थापनं कृत्वा त्वम् अभिषेक्ष्यसे। ततः भगवतः आज्ञानुसारं महादेवः शिवः भगवतः प्रीतये स्तुतिं कृत्वा तत् एकाम्रकाननं प्रति जगाम। द्वापरयुगे महादेवः श्रीकृष्णवलरामलक्ष्म्यादीन् सन्तुष्टं कृत्वा एकाम्रकानने अतिष्ठत्। पितामहः ब्रह्मा साक्षात् अस्य महादेवस्य कोटिलिङ्गरूपेण स्थापनं कारितवान्। नारदः तं राजानं तत् क्षेत्रं प्रति गत्वा भगवतः अनुग्रहं प्राप्तुं निवेदयामास। तत् एकाम्रकाननं तमस्तथा रजोगुणं विनाशयितुम् उत्कृष्टस्थानं विद्यते। एतस्मात् कारणादस्य नाम विरजमण्डलं भवति। परन्तु पुरुषोत्तमक्षेत्रं सत्त्वगुणस्य प्राधान्यकारणतः मुक्तिदायकं तीर्थं मन्यते। एतानि सर्वाणि तीर्थानि पापैः युक्तस्य मानवस्य विश्वासपथि समागतानि न भवन्ति। तदर्थं भगवतः क्षेत्रमिदं गोपनीयं भवति।

नारदेन सह राजा एकाम्रकाननं प्रति गत्वा यथाविधि पूजापूर्वकं कोटिलिङ्गानां दर्शनं कृत्वा ब्राह्मणेभ्यः गजाश्वधेनुरत्नवस्त्रादीनां दानं ददौ। अस्मिन् एकाम्रकानने भगवतः विष्णोः तथा शिवस्य अभेदेन दर्शनं कृत्वा मनसि अशेषशान्तिं लेभे। ततः राज्ञः भक्तिपूतेन अर्च्चनेन तुष्टः शिवः नरपतिं प्रति स्पष्टवाक्येन मनोवाञ्छा पूर्णा भवतु इति प्राह।

.. भगवान् शङ्करः इन्द्रद्युम्नं प्रति पुरुषोत्तमक्षेत्रे सहस्राश्वमेधयज्ञसंपादनार्थं प्रेरयामास। पुरुषोत्तमक्षेत्रं वैष्णवानां परमप्रियक्षेत्ररूपेण सर्वत्र राराजते। पुरुषोत्तमक्षेत्रं विष्णोः हृदयस्वरूपं वर्तते। तत्र याः अन्तर्वेद्यः विद्यन्ते तत्र अष्टमूर्त्तिरूपेण रक्षार्थं महादेवस्य अंशभूताः सर्वे विराजन्ते। तस्य शङ्खक्षेत्रस्य अग्रभागे नीलकण्ठरूपेण साक्षात् स्वयम्भुः विद्यमानो वर्तते। भगवान् श्रीहरिः इदानीं तत्र अन्तर्हितः जातः, अतः तत्र गत्वा नृसिंहस्य क्षेत्रं स्थापयितुम् आदेशं ददौ। तत्र गत्वा अद्भुतवृक्षमपि द्रष्टुं प्रबोधयामास। साक्षात् ब्रह्मा तत्रागत्य तेन काष्ठेन मूर्त्तिनिर्माणं करिष्यति। अतः सहस्राश्वमेधं यज्ञं कृत्वा तत्र निष्पापो भव इति प्राह। निष्पापो भूत्वा अपवर्गदातारं विष्णुं दारुरूपेण दर्शनं करोतु।

ततः इन्द्रद्युम्नः भगवन्तं शिवं कोटिशः प्रणामाञ्जलीं समर्प्य पुरुषोत्तमक्षेत्रं प्रति गन्तुमुद्यतो बभूव। इहलोके विष्णोः प्राप्तिनिमित्तं एर्वेषु मार्गेषु पुरुषोत्तमक्षेत्रे निवासः एव श्रेष्ठोपायो विद्यते। तत्र ये निवसन्ति ते

भगवतः सायुज्यमुक्तिं प्राप्नुवन्ति। सैन्यैः सह इन्द्रद्यम्नः नीलपर्वतस्थं पुरुषोत्तमक्षेत्रं प्रति भगवतः स्थापनार्थं गतवान्। ततः नारदेन सह पुनः यात्राभिमुखे नरपतिः जगाम। यस्य क्षेत्रस्य माहात्म्यं देवाःवर्णयितुं समर्थाः कदाचित् न भवन्ति तस्मिन् पुरुषोत्तमक्षेत्रे सहस्राश्वमेधयागं कर्तुं मनसि धृत्वा राजा इन्द्रद्युम्नः विचचार।

**बोधप्रश्नः**

१. कः कैलासपर्वताभिमुखे यात्रां चकार ?

२. कपोतेश्वरः कः ?

## भगवतः कपोतेश्वरस्य माहात्म्यम्

नारदेन सह राजा द्वितीयदिवसे कपोतेश्वरस्य शिवस्य प्राङ्गणे उपनीतो बभूव। तत् स्थानं विविधेषु वृक्षेषु आवृतः तथा चतुर्पार्श्वे जलाशये परिपूर्णमासीत्। तत्र राजा इन्द्रद्युम्नः कपोतेश्वरस्य तथा विल्वेश्वरस्य दर्शनं कृतवान्। पुराकाले सर्वजन्तुभिः असेव्या, तथा तीक्ष्णाधारकुशाग्रैः कण्टकैश्च सुप्रसिद्धा काचित् कुशस्थली आसीत्। तस्मिन् स्थाने वृक्षजलाशयादयः नासन्। सर्वेषां पिशाचानां वासस्थानमिति प्राक् तत् स्थानं विवेचितमासीत्। पूर्वकाले एकः एव श्रीहरिः सर्वेषां पूज्यः आसीत्। तदतिरिच्य न कोऽपि देवः समेषां पूज्यः आसीत्। कदाचित् भगवान् शङ्करः मनसि सर्वं विषयभोगं परित्यज्य जनशून्ये स्थाने भगवन्तमाराधयितुं चिन्तयामास। ब्राह्मण्डेश्वरस्य भगवतः श्रीहरेः सन्तोषार्थं किं वा कर्तुं शक्यते इत्यभिसन्धाय नीलपर्वतस्थे तस्मिन् स्थाने प्राविवेश। तत्र महादेवः वायुभोजनपूर्वकं तीव्रतपः चचार। तस्मिन् समये अष्टमूर्त्तिरपि महेश्वरः कपोत इव सूक्ष्मोऽभूत्। तदानीं भगवान् विष्णुः सन्तुष्टो भूत्वा सकलानामैश्वर्याणां प्रदानं कृतवान्, येन सः महादेवः पूज्यो जातः। भगवतः आशीर्वादेन सा कुशस्थली विविधेषु तडागेषु वृक्षेषु फलपुष्पविहङ्गभ्रमरादिषु आच्छादिता जाता। तदानीं शिवः तपः आचरणं कृत्वा कपोत इव सूक्ष्मोऽभूत्, उक्तकारणादेव सः शिवः कपोतेश्वरः इति नाम्ना प्रसिद्धो जातः। तस्मिन् स्थाने तस्मादेव मृडान्या सह मृडः अवस्थितो विद्यते। ये कपोतेश्वरस्य शिवस्य आराधनां कुर्वन्ति ते निष्पापाः भविष्यन्ति। अकर्मकर्मदायकस्य भगवतः महादेवस्य दर्शनं तस्मिन् स्थाने यः करोति सोऽपि मोक्षपदवीं प्रति याति। भगवतः शङ्करस्य तुष्टये तत् स्थान सर्वेषु स्थानेषु मुख्यत्वेन परिगण्यते।

**बोधप्रश्न:**

१. कुशस्थली कीदृशी आसीत्?

२. क: विष्णुतुल्य: पूज्य: अभूत्?

## विल्वेश्वरस्य माहात्म्यम्

कदाचित् पूर्वकाले सर्वेऽपि पातालवासिन: दैत्या: महीतलं भित्त्वा भूलोके प्रविश्य जनान् भक्षयन्त: आसन्। तस्मिन् समये भगवान् विष्णु: देवकीगर्भसम्भवो भूत्वा पथिवीं पालयामास। तदानीं पाण्डवैस्तथा यादवै: सह श्रीकृष्ण: तत्र आजगाम। तत्र श्रीकृष्ण: सर्वान् मोहयित्वा भगवत: शिवस्य आराधनां चकार। भगवत: त्रिपुरस्य तथा अन्धकस्य नाशकाय भगवते शिवाय विधिवत् पूजार्चनं कृत्वा तोषयामास। भगवान् श्रीकृष्ण: शिवस्य स्तुतिं कृतवान्। भूतभविष्यवर्तमानस्य ज्ञातारं भगवन्तं महादेवं नमस्कृत्य सर्वे यादवा: पाण्डवाश्च अर्चनं च कृतवन्त:। भगवत: अनुग्रहेण तेन मार्गेण ससैन्यै: सह श्रीकृष्ण: तस्मिन् विवरे प्रवेशमकरोत्। पाताललोकं प्रति गत्वा सर्वान् दैत्यान् नाशयित्वा तेन विवरमार्गेण पुन: आगत्य वृषध्वजस्य भगवत: शिवस्य ध्यानमकरोत्। तस्मिन् स्थाने द्वारस्य अवरोधनिमित्तं भगवान् श्रीकृष्ण: भगवत: शिवस्य स्थापनं चकार। श्रीकृष्ण: तदानीं भगवन्तं शिवं प्रति प्रोवाच हे भगवन्! भवान् एव विवरद्वारमवरोधपूर्वकं तिष्ठतु । तत: विश्वेश्वर: महादेव: विल्वेश्वरनाम्ना प्रसिद्धो जात:। अयं महादेव: विल्वेश्वरस्य नीलगिरिपर्वतस्य पूर्वभागे विद्यते। य: विल्वेश्वरस्य दर्शनपूर्वकं पूजार्च्चनादिकं समाचरति तस्य अशेषपुण्यं भवति। इहलोके अभिलषितवस्तूनि प्राप्तये विल्वेश्वर: सहायो भवति। एष: विल्वेश्वर: पातालपुरस्य मार्गावरोधकरूपेण तत्र पूर्वस्यां दिशि अवस्थितो विद्यते।

**बोधप्रश्न:**

१. नीलगिरिपर्वतस्य पूर्वभागे क: विद्यते?

२. विवरद्वारं क: अवरुणद्धि?

## सारांशः

पुराणवाङ्मये सर्वबृहत् पुराणं नाम्ना प्रसिद्धस्य स्कन्धमहापुराणस्य विष्णुखण्डे यथा शिवतत्त्वस्य निरूपणं विहितं वर्तते तत् अन्यत्र कुत्रचित् स्वल्पमेव भाति। अध्यायेऽस्मिन् उड्रप्रदेशस्य वर्णनं विहितं दृश्यते। उत्कलस्य नृपस्य विषये अपि अस्मिन् महापुराणे चर्चा दृश्यते। राजा इन्द्रद्युम्नः सर्वाणि तीर्थानि अतिक्रम्य एकाम्रकानने प्राविवेश। तत्र भगवतः शिवस्य आशीर्वदेन काशीराजस्य पराक्रमविषये चर्चा विहिता वर्तते। एकाम्रकानने कोटिलिङ्गानां स्थापनं तथा तस्य ऐतिह्यं विष्णुखण्डान्तर्गतेऽस्मिन् अध्याये प्रतिपादितं विद्यते। एकाम्रकानने भगवतः नारदस्य मुखात् सकलं रहस्यं श्रुत्वा सः राजा तस्य दर्शनं पुरःसरं सकलपापविनाशपूर्वकं कपोतेश्वरस्य शिवस्य दर्शनं चकारः। तत्र कपोतेश्वरस्य माहात्म्यं तथा भगवतः शिवस्य उग्रतपस्यायाः प्रभावः वर्णितो विद्यते। ततः विल्वेश्वरस्य महिमा वर्णितो विद्यते। भगवान् श्रीकृष्णः येन मार्गेण गत्वा पाताले सर्वान् राक्षसान् विनाशं चकार, तस्य विवरस्य मुख्यद्वारभागे भगवान् शिवः अवस्थितः वर्तते।

# आदर्शप्रश्ना:

## लघुत्तरीयप्रश्ना:

१. एकाम्रकाननस्य माहात्म्यम्।

२. विल्वेश्वरस्य माहात्म्यम्।

३. कपोतेश्वरस्य माहात्म्यम्।

## विश्लेषणात्मकप्रश्ना:

१. एकाम्रकानने कोटिलिङ्गानां स्थापनं विशदयत।

२. कपोतेश्वरस्य स्थापनं वर्णयत।

३. श्रीकृष्णस्य दैत्यान् संहारं निरूपयत।

## निवन्धात्मकप्रश्ना:

१. भगवत: शिवस्य तप: स्पष्टयत।

२. एकाम्रकाननस्य शोभां दर्शयत।

## एकाङ्कप्रश्ना:

१. महादेव: इति नाम्ना क: देव: प्रसिद्ध: ?

२. शिव: तपस्यां कृत्वा कीदृशो बभूव ?

३. नीलगिरिपर्वतस्य कस्यां दिशि कपोतेश्वर: विद्यते ?

४. क: विवरप्रदेशं रुणद्धि ?

५. क: विल्वेश्वरस्य दर्शनं चकार ?

६. भगवान् शिव: तप: आचरितुं कुत्र जगाम ?

७. क: पातालं गतवान् ?

८. कोटिलिङ्गानां स्थापनं क: अकरोत् ?

९. एकाम्रकाननं कस्मिन् प्रदेशे विद्यते ?

१०. कियत् क्रोशम् एकाम्रकाननं विद्यते ?

११. एकाम्रकानने कः तिष्ठति ?

१२. भगवन्तं शिवं तपः अचरणं कृत्वा कः तोषयामास ?

**उत्तराणि**

१. शिवः २. कपोतः ३. पूर्वस्यां ४. शिवः ५. इन्द्रद्युम्नः ६. कुशस्थलीं

७. श्रीकृष्णः ८. ब्रह्मा ९. उड्रदेशे १०. पञ्चक्रोशं ११. शिवः १२. काशीराजः

# षष्ठोऽध्यायः

## प्रस्तावना

स्कन्धपुराणस्य विष्णुखण्डेऽस्मिन् यद्यपि पुरुषोत्तमक्षेत्रविषयकं वर्णनं सर्वत्र दृश्यते तथापि स्थलविशेषेषु भगवतः शिवस्य विविधानि चरित्राणि प्रस्तूयन्ते। तीर्थक्षेत्रेषु वाराणस्याः वर्णनं सुविदितं वर्तते। एकाम्रकाननक्षेत्रे भगवतः शिवस्य दर्शनानन्तरं इन्द्रद्युम्नस्य पुरुषोत्तमक्षेत्रं प्रति गमनं मार्मीकतया प्रतिपाद्यते। अस्मिन् अध्याये नारदैः सह इन्द्रद्यम्नस्य पुरुषोत्तमक्षेत्रं प्रति गमनं तथा भगवतः अदर्शनकारणतः इन्द्रद्युम्नस्य शोकः वर्णितो विद्यते। यानि यानि अशुभलक्षणानि दृष्टानि तानि सर्वाणि प्रतिपादितानि वर्तन्ते। ततः नारदस्य इन्द्रद्युम्नं प्रति बोधनस्य विवरणं दर्शितमस्ति।

## उद्देश्यम्

अस्मिन् अध्याये सर्वे छात्राः एतान् सर्वान् विन्दून् पठिष्यन्ति।

- **भगवतः अन्तर्द्धानं श्रुत्वा इन्द्रद्युम्नस्य शोकः**
- **इन्द्रद्युम्नं प्रति नारदस्य प्रतिबोधनम्**
- **भगवतः पुनराविर्भावः**
- **राज्ञः इन्द्रद्युम्नस्य शोकनिवृत्तिः**
- **प्रासादनिर्माणम्**
- **नृसिंहमूर्त्तिप्रतिष्ठापनम्**
- **नृसिंहतीर्थदर्शनस्य फलम्**

### भगवत: अन्तर्द्धानं श्रुत्वा इन्द्रद्युम्नस्य शोक:

सर्वेषां तीर्थानां दर्शनं कृत्वा नारदादिभि: सह नरपति: इन्द्रद्युम्न: नीलकण्ठस्य समीपमुपजगाम। इन्द्रद्युम्नस्य गमनमार्गेण अशुभलक्षणानि समागतानि आसन्। राज्ञ: इन्द्रद्युम्नस्य वामाक्षिभुजयो: स्फुरणं मुहुर्मुहु: अभवत्। एतन्निशम्य इन्द्रद्युम्न: विषादग्रस्तो बभूव तथा एतेषामशुभलक्षणानां कारणानि कानि भवन्ति इति असकृत् पृष्टवान्। इन्द्रद्युम्न: अव्याहतं साम्राज्यं शान्तमुत्तमं क्षेत्रं दृष्ट्वा किमर्थम् एतानि अशुभलक्षणानि समायातानि सन्ति इति चिन्तयामास। राज्ञ: इन्द्रद्युम्नस्य विषादग्रस्ततां विपश्यन् महर्षि: नारद: ब्रह्मणा उक्तान् विषयान् प्रतिपादयामास। सकले अविकृते सति नीलमाधवस्य अन्तर्हितकारणादेव एतादृशानि लक्षणानि प्रतीयमानानि भवन्ति । विद्यापते: दर्शनानन्तरं सायंकाले भगवत: नीलमाधवस्य स्वर्णवालुकायां अनर्द्धानमभूत्। तत: इन्द्रद्युम्न: एतादृशं वाक्यं नारदमुखात् श्रुत्वा नि:संज्ञो भूत्वा भूमौ पतितोऽभवत्। इन्द्रद्युम्नस्य एतादृशीम् अवस्थां दृष्ट्वा सर्वे पौरहिता: ब्राह्मणा: च मन्त्रपूतजलेन मुहुर्मुहु: लिलिपु:। तत: अतियत्नेन अविलम्वे चामरादि सर्वे कृतवन्त:। नारद: अपि नरपतिं उत्तरकालीनशुभनिश्चयतां विज्ञाय प्राणादीन् रक्षयामास। किञ्चित् कालानन्तरं स: राजा इन्द्रद्युम्न: चैतन्यं प्राप्तवान्। नारदस्य पादपद्मे पतित्वा बहु विलापं कृतवान्। राजा जन्मजन्मान्तरे कीदृशं पापमाचरितवान् यस्य दुर्द्दशा इदानीं प्राप्तवान् इति अचिन्तयत्। नित्यनैमित्तिककाम्यादीनि कर्माणि अनुष्ठाने कदाचिदपि कर्त्तव्यविमुखो न भूत्वा स: सर्वं कृतावान्, तथा देवतातिथिपितृबन्धुवर्गान् प्रति विमुखो न अभूत्, अत: किमर्थमेतत् इति इन्द्रद्युम्न: मुहुर्मुहु: चिन्तयामास। पुन: कीदृशं भाग्यं विद्यापते: यत् तस्य राज्ञ: नास्ति इत्यपि ज्ञातवान्। तत: राजा इन्द्रद्युम्न: नारदं प्रति किमर्थं ज्ञात्वाऽपि राज्यभ्रष्टं कारितवान् इति पप्रच्छ। वृथया ब्रह्मनिष्ठान् ब्राह्मणान् प्रति कर्त्तव्यविमुखं कारितवान् इति विचिन्त्य राजा आत्मानं धिक्कारं कृतवान्। यदि हरे: दर्शनं दुर्लभं भवति तर्हि अत्रैव प्राणविसर्जनमेकान्तं काम्यमिति स: राजा अब्रवीत्। तत: इन्द्रद्युम्न: आत्मन: पुत्रं नीत्वा राज्याभिषेकं कुर्वन्तु इति नारदं प्रति प्राह। श्रीक्षेत्रे अवस्थानपूर्वकं व्रतादीनि अनुष्ठानं कृत्वा यावज्जीवं अनशनं कृत्वा प्राणविसर्जयामि इति राजा अकथयत्।

**बोधप्रश्न:**

१. अशुभलक्षणानि कानि विद्यन्ते ?

२. क: व्रतानुष्ठानं कर्त्तुं जगाम ?

## इन्द्रद्युम्नं प्रति नारदस्य प्रतिबोधनम्

मुनिसत्तमस्य नारदस्य पादयुगले पतित्वा राजा इन्द्रद्युम्नः अत्यन्तं दुःखेन विलापं कृतवान्। बहुविलापानन्तरं नारदः इन्द्रद्युम्नं प्रति शोकात् विनिर्मुक्तो भूत्वा धैर्यमवाप्य जीवितुं प्रेरयामास। श्रेयः सततं विघ्नसङ्कुलं भवति तथा चर्मचक्षुरादिभिः इन्द्रियैः भगवतः दर्शनमत्यन्तं पुण्यप्रदमिति अबोधयत्। भगवतः श्रीहरेः लीला न कोऽपि वक्तुं वर्णयितुं च भूमण्डले समर्थो विद्यते। भगवति दृढ़भक्तिमाध्यमेन सर्वं साधयितुं शक्यते। शतशतजन्मनादनन्तरमपि भगवतः माया दूरत्यया भवति। भगवतः मायां न कोऽपि ज्ञातुं शक्नोति, साक्षात् ब्रह्मा तस्य भगवतः नाभिकमलात् प्रादुर्भूतो भूत्वाऽपि तस्य मायां ज्ञातुं न शक्नोति। श्रीहरेः अत्यन्तं गूढ़तमं रहस्यं ततः नारदः प्रतिपादयामास। अस्य विष्णोः चतुर्धामूर्त्तिः भवति। एतत्सर्वं साक्षात् लोकपिता ब्रह्मा प्रोवाच। सः विभुः धर्मराजस्य यमस्य प्रार्थनामङ्गीकृत्य तस्मात् स्थानात् विनिष्क्रान्तो बभूव। ब्रह्मणपञ्चमसन्तानं भवति राजा इन्द्रद्युम्नः। सहस्राश्वमेधयज्ञानन्तरं श्वेतद्वीपात् भवतः विमुक्तिः भविष्यति इति नारदः प्राह। तदानीं भवान् चर्मादिभिः द्वारा भगवतः साक्षात् दर्शनं प्राप्तुं शक्नोति इति अब्रवीत्। पुरुषोत्तमक्षेत्रे भगवतः दारुविग्रहं साक्षात् ब्रह्मा करिष्यति इति अवोचत्। नारदः एतादृशानि वाक्यानि उक्त्वा तं राजानं सान्त्वयित्वा प्रबोधयामास। ततः तस्मिन् दुर्गमस्थाने नीलकण्ठः भगवान् शिवः विराजते, तथा तत्र गत्वा सहस्राश्वमेधयज्ञं कृत्वा नीलाद्रिनाथस्य मूर्त्तिं निर्माय दर्शनं करिष्यामः। तत्र नरसिंहस्य स्थापनं कृत्वा विघ्ननाशाय प्रतिष्ठां कृत्वा अश्वमेधयज्ञं करिष्यामः इति नारदः प्रोवाच।

**बोधप्रश्नः**

१. भगवतः अन्तर्द्धानं श्रुत्वा कः रुरोद ?

२. अश्वमेधयागं कर्त्तुं कः समागतः ?

## भगवतः पुनराविर्भावः

भगवतः नारदस्य अशेषप्रेरणायाः फलस्वरूपं सर्वे नीलकण्ठस्य दर्शननिमित्तं नीलगिरिपर्वतं प्रति अगच्छन्। तं महादेवं देव्या पार्वत्या सह प्रपूज्य राजपथपरित्यागपूर्वकम् इन्द्रियसंयमं कृत्वा सानुचरैः

नीलपर्वतस्य आरोहणार्थं पदयात्रायां जग्मुः। अयं नीलपर्वतः विविधेषु लताद्रुमादिषु आकीर्ण्णो भूत्वा नानाविधैः खगैः परिपूर्णो विद्यते। सर्वत्र दुर्गमः तथा संरुद्धो विद्यते। क्षुद्रक्षुद्रप्रस्तराः इतस्ततः विक्षिप्ताः तथा दक्षिणसागरस्य तरङ्गमालायां नितम्वदेशसदृशः परिप्लावितः अभूत्। विभत्साः सर्पाः सर्वे इतस्ततः परिसर्पन्तः आसन्। सञ्चरणशीलानां तथा मत्तमातङ्गानां भीषणचित्कारेण भयाभयः आसीत्। श्वापदाः सर्वेऽपि कदाचिदपि शस्त्राघातं प्रति भुक्षेपं न कुर्वन्तः विचरन्तः आसन्। मृगाः अपि भयशून्याः सन्तः अविभ्रमन्। यदा ते सर्वे मार्गं न प्राप्तवन्तः तान् सर्वान् अपि नारदः दिव्यपथि नीत्वा नीलपर्वतस्य शिखरदेशे प्राविवेश। ततः कृष्णागुरुतरोरधः भगवन्तं विपदभञ्जनं नारायणं नरसिंहरूपेण ददृशुः। तस्य भगवतः दन्ताः अतीव तीक्ष्णाः आसन्। यस्य दर्शनमात्रे सकलानां दुःखानां विनाशो भवति सः परब्रह्मपरात्परनारायणः नरंसिहरूपेण विद्यमानः आसीत्। तदीया आभा अवर्णनीया आसीत्। भगवतः श्रीमुखे अट्टहास्यं तथा द्वाभ्यां बाहुभ्यां चञ्चलितशङ्खचक्रे विद्येते स्म। मुखाद् ज्वलन्ताम् अग्निशिखामासीत्। प्रचण्डाघातत्वात् पदपङ्कजद्वयं भूमौ सन्तापितमासीत्। ते सर्वेऽपि नारदेन सह नरसिंहस्य दर्शनं संप्राप्य निर्भयेन प्रणामपूर्वकं मानसिकदुःखं परितत्याजुः। राजा इन्द्रद्युम्नः एतादृशं भीषणं रूपं दृष्ट्वा पूर्वोक्तवाक्ये विश्वासं संस्थाप्य कृतार्थो बभूव।

**बोधप्रश्नः**

१. भगवान् केन रूपेण अजायत ?

२. कस्य भीषणं रूपम् इन्द्रद्युम्नः ददर्श ?

## राज्ञः इन्द्रद्युम्नस्य शोकनिवृत्तिः

नीलगिरिपर्वतशिखरे सर्वे भयं परित्यज्य भगवतः नृसिंहस्य दर्शनं लेभिरे। भगवतः ब्रह्मणः पुत्रस्य नारदस्य अनुग्रहेण सर्वमेतदभूत् इति हेतोः राजा इन्द्रद्युम्नः मानसिकीं शान्तिं संप्राप्य कृतार्थोऽभवत्। अस्य नृसिंहस्य दर्शनेन अशेषपातकराशेः नष्टः जातः। कदाचिदपि एतादृशस्य उग्ररूपधारिणः नृसिंहस्य आराधनां कर्त्तुं क्षीणवीर्याः मानवाः न शक्नुयुः। ततः इन्द्रद्युम्नः नारदं प्रति यत्र भगवतः लीलामयस्य मूर्त्तिः विद्यते तत् स्थानं दर्शनार्थं कथयामास। नारदः अपि स्वर्णवालुकास्थितस्य जगन्नाथस्य पवित्रस्थानं दर्शयामास। एकयोजनं यावत्

विस्तृतं तथा योजनद्वयं यावत् उन्नतो वटवृक्षः कल्पान्तस्थायी विद्यते। अस्य दर्शनं मुक्तिदायकं भवति, पुनः छायायाः स्पर्शनेन सर्वे पापात् प्रमुच्यन्ते। अस्य मूलप्रदेशे प्राणत्यागे सति वैकुण्ठलोकं प्राप्यते। अस्य वटरूपी भगवतः दर्शनमात्रेणैव कीदृशं फलं लभ्यते तत् सर्वं वर्णयितुं न कोऽपि समर्थो विद्यते। एतस्मात् वृक्षात् पश्चिमस्यां दिशि तथा नृसिंहदेवात् उत्तरस्यां दिशि नीलमाधवः चतुर्मूर्त्तिधरो विभुः अतिष्ठत्। एतत् सर्वं श्रुत्वा तस्य इन्द्रद्युम्नस्य शोकः विनष्टः जातः।

**बोधप्रश्नः**

१. चतुर्धरः कः?

२. कः शोकातुरः भूत्वा दुःखितः अभूत्?

नारदः इन्द्रद्युम्नं प्रति भगवतः प्रादुर्भावविषयकं वृतान्तं श्रावयित्वा तोषयामास। तेनैव प्रकारेण राजा नृसिंहस्य दर्शनानन्तरं भगवतः स्थानं प्रति जगाम। तत्र नारदः तं राजानं प्रति विविधप्रकारेण प्रबोधयामास। यद्यपि श्रीविष्णोः भोगभूमिः श्वेतद्वीपे विद्यते, तथापि तस्य आलयः कर्मभूमिरूपेण अत्रापि विद्यते। भगवतः स्थानमिदमत्यन्तं दुर्लभं तथा गोपनीयं वर्तते। ये मोक्षस्य अधिकारिणः भवन्ति ते एव अस्मिन् स्थाने स्थातुं शक्नुवन्ति। पापिष्ठानां विश्वासः कदाचिदपि भगवति न भवति। भगवतः विष्णोः प्रादुर्भावः कस्यचित् विशेषकारणतः एव भवति। युगे युगे दुष्टानां संहारार्थं साधूनां रक्षार्थं विभोः अवतारं भवति। साधूनामनुग्रहनिमित्तं भगवतः मत्स्यकूर्मादयः अवताराः भवन्ति। सः विश्वेश्वरः श्वेतद्वीपे यथा वर्तते अन्यत्रापि तथैव विचरति। सर्वत्र भगवतः अंशावताराः विद्यन्ते, परन्तु सः देवः एतस्मात् स्थानात् कदाचिदपि विच्युतो न भवति। ततः नारदः भगवतः स्थानं दर्शयामास। राजा इन्द्रद्युम्नः अपि तत्र भगवान् विराजते इति विचिन्त्य साष्टाङ्गं प्रणिपातपुरःसरं ननाम। ततः सः इन्द्रद्युम्नः भगवतः विविधरूपेण स्तुतिं कृत्वा गुणगानं चकार। जगतः सृष्टिस्थितलयनां गतिमुक्तिहेतवे असकृत् नमनं कृत्वा भक्तिपूतनिवेदनं कृतवान्। ततः आकाशमार्गात् देववाणी अभूत्। देवर्षिः नारदः यथा वदिष्यन्ति तथैव आचरणं कुरु। अवश्यं भगवान् इन्द्रद्युम्नस्य कृते दर्शनार्थम् अनुग्रहं करिष्यति। अतः सः राजा अपि देवर्षेः नारदस्य वाक्यानि यथा वर्तन्ते तथैव अनुष्ठानं कृत्वा भगवन्तं तुष्टाव।

**बोधप्रश्न:**

१. श्वेतद्वीपे क: निवसति ?

२. नारद: कस्य कृते अनुग्रहं चकार ?

## प्रासादनिर्माणम्

आकाशात् देववाणीं श्रुत्वा स: राजा मुनिपुङ्गवस्य वाक्यानुसारं कार्यं विधातुं प्रयतते स्म। तत: नारद: महाक्रतौ श्रद्धधानं दृष्ट्वा परमप्रीत्या राजानं कथयामास। हे राजन्! कार्यकुशलान् जनान् भगवान् सदैवं सहायं करोति। अस्मिन् विषये साक्षात् प्रमाणभूतो भवान् एव वर्तते। इत: वयं सर्वेऽपि भगवत: नीलकण्ठं प्रति व्रजाम: इति नारद: प्रबोधयामास। तत्र सर्वविघ्ननाशकस्य श्रीनरसिंहस्य स्थापनं महादेवस्य पश्चिमाभिमुखीं कृत्वा करिष्याम:। यद्यपि अन्तर्यामी भगवान् नारयणस्वरूपभूतो नीलमाधव: अन्तर्हितो बभूव तथापि तस्य अवतारभूत: नरकेशरी नरसिंह: साक्षात् विद्यमानो वर्तते। अस्य देवस्य पुरत: यज्ञानुष्ठानं क्रियते चेत् सुतरां फलप्रदं भवति। तत्र गत्वा परमं कर्त्तव्यं भवति यागकरणार्थं गृहनिर्माणम्। ब्रह्मण: वाक्यस्य स्मरणानुसारं विश्वकर्मण: पुत्र: तत्रागत्य प्रासादस्य निर्माणं करिष्यति। भगवत: नीलकण्ठस्य दक्षिणस्यां दिशि शतचतुष्टयपरिमिति य: चन्दनद्रुम: चिरकालादेव विराजते, तस्य पश्चिमस्यां दिशि अस्य देवस्य क्षेत्रं यथा भवेत् तदनुगुणं कार्यं स्यात्। तत: नरसिंहस्य सन्निधाने सहस्राश्वमेधयागं कुरु इति नारद: प्राह। यदा राजा इन्द्रद्युम्न: तत् स्थानं प्रति जगाम तदानीं विश्वकर्मण: पुत्रं ददर्श। स: ब्रह्मण: आदेशक्रमे शस्त्रसूत्रादीनि धृत्वा तत्र अतिष्ठत्। स: राजानं प्रति समागत्य यथोचितस्य प्रासादस्य निर्माणं करिष्यति इति अब्रवीत्। राजा इन्द्रद्युम्न: देवाधिदेवस्य परात्परस्य नित्योपासकस्य तथा नारदस्य वचनमाकर्ण्य प्राकारतोरणविशिष्टस्य प्रासादस्य निर्माणार्थं प्रबोधयामास। तत: राजा विविधान् भृत्यान् शिलासंग्रहणार्थं नियोजयामास। तत: चतुर्थे दिने प्रासदस्य निर्माणमभूत्।

**बोधप्रश्न:**

१. प्रासादनिर्माणार्थं क: प्रबोधयामास ?

२. कुत्र प्रासादनिर्माणमभूत् ?

## नृसिंहमूर्त्तिप्रतिष्ठापनम्

शिल्पशास्त्रविशारद: स: विश्वकर्मण: पुत्र: नानाप्रकारेण तस्य प्रासादस्य निर्माणमकरोत्। एतादृशं प्रासादं निर्मातुं चतुर्दिनानि व्यतितानि जातानि आसन्। तत: पञ्चमे दिवसे स: नरपाल: नित्यकार्यसम्पादनपूर्वकं विविधानि वस्तूनि समायोजनं कृत्वा नारदस्य आगमनं प्रति प्रतीक्ष्यमान: आसीत्। अस्मिन् समये आकाशात् शङ्खमृदङ्गमुरजप्रभृतिभि: मङ्गलध्वनिं शुश्राव। तस्य ध्वने: श्रवणं कृत्वा स: महीपाल: विस्मयो बभूव। अन्येऽपि सर्वे आश्रयशून्यं शब्दं श्रुत्वा वितर्कं चक्रु:। अस्मिन् समये दक्षिणस्यां दिशि गन्धन्वितवायु: ववार, तथा सर्वेऽपि भ्रमरा: गुञ्जितध्वनिना सुशीतलं पुष्पवर्षणं कारयामासु:। तत: नारद: नृसिंहस्य मूर्त्तिं रथे संस्थापितवान्। तस्य देवस्य प्रतिमाया: पार्श्वे दिव्यरमणीयरत्नचामरादय: सुशोभिता: आसन्। तस्य भगवत: नरसिंहस्य मूर्त्ति: विविधरत्नालङ्कारदिव्यवसनगन्धादिभि: परिव्याप्त: आसीत्। यस्य दर्शनेन मनसि आनन्दो जायते। तस्य देवस्य दर्शनानन्तरं सर्वे ब्राह्मणा: तथा अन्ये च अन्तर्हित: देव: किं नारदेनाहूत: इति चिन्तयामासु:। इन्द्रद्यम्न: तस्य भगवत: नृसिंहस्य दर्शनपूर्वकं प्रदक्षिणं कृत्वा नमनं चकार। शुभलक्षणयुक्ते समये तस्य देवस्य प्रतिमाया: प्रासादमध्ये संस्थापयामास। तत: भगवत: परिचर्यानिमित्तं द्वयो: ब्राह्मणयो: स्थापनं रत्नवेद्यामकरोत्। पुन: राजा नारदादिभि: सह मिलित्वा वेदोपनिषत्स्मृतिशास्त्रादिषु वर्णितमन्त्रेण तुतोष।

**बोधप्रश्न:**

१. कस्य देवस्य दर्शनं साक्षात् इन्द्रद्यम्न: कृतवान्?

२. क: नृसिंहमूर्त्तिं प्रतिष्ठापयामास?

## नृसिंहतीर्थदर्शनस्य फलम्

राजा इन्द्रद्युम्न: भगवत: नृसिंहस्य विविधरूपेण स्तुतिमकरोत्। भगवत: ब्रह्मण: अनुग्रहपूर्वकं देवशिल्पविशारदेन विश्वकर्मण: पुत्रेण निर्मिते प्रासादे नृसिंहदेवस्य प्रतिमाया: स्थापनमभूत्। रत्नवेद्यां पूजार्चनार्थं ब्राह्मणानामपि नियुक्तिरभूत्। सर्वेषां जनानां हिताय ब्रह्मण: आदेशानुसारमस्य क्षेत्रस्य निर्माणं जातम्। अत्र भगवत: नीलकण्ठेन सह नरसिंहस्य दर्शनं ये जना: कुर्वन्ति ते देहरूपवन्धनात् प्रमुच्यन्ते। यद् मनसा जना:

वाञ्छन्ति तत् अवश्यं सिद्धिप्रदं भवति। पुनः ये जनाः स्तोत्रेण नरसिंहस्य स्तवं कुर्वन्ति, सर्वाभीष्टपूर्वकं नृसिंहदेवः तान् सर्वान् रक्षति। महर्षिः नारदः ज्येष्ठशुक्लद्वादश्यां स्वातीनक्षत्रयुक्तेन योगेन दिव्यनृसिंहस्य प्रतिष्ठापनमकरोत्। ये जनाः तत् स्थानं प्रति गमनं कृत्वा दर्शनं कुर्वन्ति ते सहस्राश्वमेधयज्ञस्य सम्पूर्णं फलं प्राप्नुवन्ति। पुनः ये पञ्चामृतेन दुग्नेन नारिकेलफलेन वा भगवतः स्नानं कारयित्वा पायसाद्युपचारैः पूजनं स्तुतिपाठनं प्रदक्षिणं च कुर्वन्ति, ते सर्वोत्तमं दिव्यब्रह्मलोकं प्रति यान्ति। अस्य नृसिंहदेवस्य आद्यावतारः वैशाखशुक्लदशम्यां तीथौ शनिवासरे स्वातीनक्षत्रयुक्ते प्रदोषसमये समभवत्। उक्तदिवसे समाहितो भूत्वा नृसिंहदेवस्य पूजार्चना क्रियते चेत् सहस्रकोटिजन्मनः सञ्चितपापराशिः अग्नौ तुलाराशितुल्यं भस्मीभूतो भवति। नरसिंहस्य दर्शनं स्पर्शनं नमनं तथा जपविधानं कृते सति पापस्य आवरणात् सर्वदा प्रमुच्यते। निखिलाभीष्टसाधनं तथा सहस्राश्वमेधयज्ञफलं लभते। नृसिंहस्य प्रसादेन तत्कृतानि यागदानपुण्यानि कोटिगुणितानि भवन्ति।

**बोधप्रश्नः**

१. कः नृसिंहतीर्थस्य फलं वक्ति ?

२. सहस्राश्वमेधस्य फलं कुत्र लभते ?

## सारांश:

अध्यायेऽस्मिन् भगवतः नीलमाधवस्य अन्तर्द्धानं समुपवर्णितं वर्तते। प्रागेव ब्रह्मणा प्रतिपादितस्य विभोः अन्तर्द्धानस्य रहस्यं नारदः राजानं प्राह। ततः राजा नारदवचनमाकर्ण्य शोकातुरो भूत्वा रुरोद। पुनः भगवतः नारदस्य राजानं प्रति प्रतिबोधनं मार्मीकतया अस्मिन् अध्याये प्रतिपादितम्। मार्गे विविधानि अशुभलक्षणानि दृष्ट्वा राजा तदानीं चिन्तितो बभूव। पुनः ब्रह्मणः आज्ञानुसारं विधिवत् सर्वं श्रुत्वा राजा इन्द्रद्युम्नः स्वकर्मणि प्रवृत्तो बभूव। नीलगिरिपर्वतस्य उपरि भगवन्तं नरसिंहं ददर्श। तस्य नृसिंहस्य दर्शनं लब्ध्वा सः राजा अतीव हृष्टमनसा भगवतः जगन्नाथस्य वालुकायां स्थितं स्थानं दृष्ट्वा तत्र भगवतः स्मरणं कृत्वा च विविधस्तुतिं चकार। तस्य राज्ञः स्तुतिद्वारा प्रसन्नो भूत्वा सः नारायणः तं ब्रह्मर्षिणा नारदेन बोधितस्य वाक्यस्य अनुसरणं कर्त्तुं प्रोवाच। एवं रूपेण अस्मिन् अध्याये विविधाः विषयाः समुपवर्णिताः विद्यन्ते।

# आदर्शप्रश्नाः

## लघुत्तरीयप्रश्नाः

१. नृसिंहमूर्त्तिप्रतिष्ठापनम्।

२. प्रासादनिर्माणम्।

३. नृसिंहतीर्थदर्शनस्य फलम्।

## विश्लेषणात्मकप्रश्नाः

१. देवर्षिनारदस्य इन्द्रद्युम्नाय प्रतिबोधनं स्पष्टयत।

२. नृसिंहतीर्थस्य वेवचनं कुरुत।

३. भगवतः अन्तर्द्धानं विशदयत।

## निवन्धात्मकप्रश्नाः

१. नीलगिरिपर्वते विद्यमानान् तीर्थान् प्रतिपादयत।

२. राज्ञः इन्द्रद्युम्नस्य विषादं वर्णयत।

३. भगवतः पुनराविर्भावं प्रकाशयत।

## एकाङ्कप्रश्नाः

१. नृसिंहतीर्थस्य स्थापनं कः अकरोत्?

२. प्रासादस्य निर्माणं कस्य पुत्रः अकरोत्?

३. नारदः कस्य आदेशानुसारं कार्यमकरोत्?

४. कस्यां दिशि गन्धावहवायुः ववार ?

५. नृसिंहतीर्थः कुत्र विद्यते ?

६. कल्पान्तयावत् नीलगिरिपर्वते कः तिष्ठति ?

७. नीलकण्ठः कः ?

८. उग्ररूपधारी कः देवः विद्यते ?

९. कः अन्तर्हितो बभूव ?

१०. कस्यां दिशि नृसिंहस्य स्थापनमभूत् ?

११. क: चेतनाशून्यो बभूव ?

१२. कुत्र भगवान् अन्तर्द्धानं बभूव ?

## उत्तराणि

१. इन्द्रद्युम्नः २. विश्वकर्मणः ३. ब्रह्मणः ४. दक्षिणस्यां ५. नीलगिरिपर्वते ६. वटवृक्षः

७. शिवः ८. नरसिंहः ९. विष्णुः १०. पश्चिमस्यां ११. इन्द्रद्युम्नः १२. स्वर्णवालुकायां

# सप्तमोऽध्याय:

## प्रस्तावना

कोटिजन्मन: पुण्यवलेन एव भगवत: सान्निध्यं तथा भक्तिभावना स्वत: आयाति। भगवद्भक्तानां तथा वैष्णवानां परमत्यागेन तथा भगवत् चिन्तनेन तादृशं सुकृतं लभ्यते। अत: भगवति विश्वासं संस्थाप्य अनुरागपूर्वकं मनसि भगवत: चिन्तनं मननं ध्यानं च य: करोति, स: भगवत: दर्शनमवश्यं प्राप्नोति। राजा इन्द्रद्युम्न: अशेषसाम्राज्यं त्यक्त्वा पुरुषोत्तमक्षेत्रं प्रति भगवत: दर्शननिमित्तं समागत: आसीत्, परन्तु तस्य दर्शनं न लेभे। तत: प्रागेव आगतस्य पौरहित्यस्य विद्यापते: अशेषपुण्यवलेन स: भगवत: दर्शनमकरोत्। अध्यायेऽस्मिन् राज्ञ: इन्द्रद्युम्नस्य स्वप्ने भगवद्दर्शनं तथा सहस्राश्वमेधयागसम्पन्नो विषय: प्रतिपाद्यते। देवदुर्लभस्य देवदेवस्य नारायणस्य दर्शनमवश्यं प्राप्स्यति इति प्रेरणां स: राजा अवाप।

## उद्देश्यानि

अस्मिन् अध्याये सर्वेऽपि आदर्शान् विन्दून् वेदिष्यन्ति।

- **इन्द्रद्युम्नस्य अतिथिभ्य: अभ्यर्थना**
- **सहस्राश्वमेधयागवर्णनम्**
- **स्वप्ने भगवद्दर्शनम्**
- **अक्षयवटोत्पत्तिविवरणम्**
- **भगवत: विष्णोर्दारुमयमूर्त्याविर्भाव:**
- **इन्द्रद्युम्नसरोवरोत्पत्तिविवरणम्**
- **प्रासादनिर्माणम्**

## इन्द्रद्युम्नस्य अतिथिभ्य: अभ्यर्थना

प्रजापते: ब्रह्मण: आज्ञानुसारं राजा इन्द्रद्युम्न: सहस्राश्वमेधयागकरणार्थं प्रवृत्तो बभूव। स: सर्वादौ इन्द्रादीन् देवान् तत: सहस्रं सहस्रं विप्रान् षडङ्गै: पदक्रमाद्यधीतश्चतुरो वेदान् शास्त्रनिपुणान् परिनिष्ठितकर्मण: ऋषीन् अष्टादशविद्यासु प्रवीणान् सकुशलं सामन्त्रयामास। त्रैलोके च ये राजान: सिद्धाश्च ऋषय: द्विजा: सच्छुद्रा: वणिज: द्वीपपतय: आसन् ते सर्वेऽपि निमन्त्रिता: बभूवु:। तस्य महीपालस्य इन्द्रद्युम्नस्य सभास्थलं क्रोशद्वयं परिमितमभूत्। कुत्रचित् रत्नमयं काञ्चनमयं सुधालेपितं स्थानमासीत्। अस्य सभास्थलस्य स्तम्भा: रत्नमयोच्चवस्त्रादिषु आच्छादिता: आसन्। यथा पूर्वकाले मरुतां यज्ञशाला आसीत्, तथैव राज्ञ: इन्द्रद्युम्नस्य सभास्थलं यज्ञस्थलं च विश्वकर्मा निर्मितवान्। नरपति: शुभदिने शुभनक्षत्रे च सर्वान् सभासद: मर्यदापूर्वकं यथायोग्यमासने उपवेशनं कारितवान्। सर्वान् नृपान् सिंहासने, ऋषीन् वृष्यासने, सिद्धान् तथा ब्रह्मर्षिगणान् कुशासने देवान् काञ्चनपीठे, तथा अन्यान् संभ्रान्तान् वरासने, संस्थापनं चकार। तत: प्रभृति ऋषिगणेभ्य: शचीपतये च विष्टरादि प्रदानपूर्वकं दिव्यपुष्पगन्धमाल्यवस्त्रादिसमृद्धिभि: सह अर्च्चनं चकार। राजा तत: दीनभावापन्नेभ्य: सर्वेभ्य: जनेभ्य: धनदानं कृतवान्। तत: सिद्धेभ्य: देवर्षिभ्य: इन्द्रतुल्यं पूजाविधानं दृष्ट्वा कुवेरादय: सर्वेऽपि विस्मिता: अभूवन्। तत: अन्येभ्य: सर्वेभ्य: देवेभ्य: समार्च्चनं कृत्वा तोषयामास। तत: ब्राह्मणक्षत्रियवैश्यशूद्रादीन् सम्पदानुसारं सत्कारं कृतवान् । अन्येभ्य: अवशिष्टेभ्य: अभ्यागतपूर्वकं सत्कारं कृत्वा स: राजा हृष्टान्त:करणै: विनीतनम्रभावैश्च महेन्द्रस्य समीपं गत्वा निवेदयामास।

**बोधप्रश्न:**

१. के के अश्वमेधयज्ञं प्रति समागता: आसन्?

२. क: रत्नसिंहासने आसीत्?

## सहस्राश्वमेधयागवर्णनम्

राजा इन्द्रद्युम्न: सहस्राश्वमेधयागं विधातुं सङ्कल्पं चकार। ब्रह्मण: अनुमतिक्रमे राजा इन्द्रद्युम्न: तस्मिन् नरसिंहप्राङ्गणे विविधान् नृपान् ब्राह्मणान् समाहूय वरणं कारयामास। सर्वे देवा: भगवत: अन्तर्द्धानात् प्रागेव

ज्ञातवन्तः। ततः इन्द्रद्युम्नं प्रति आश्वासनं पूर्वकं पृथिव्यां सत्यव्रतस्वरूपभूतेषु नृपेषु अन्यतमः इति प्रोचुः। ततः सर्वे च देवाः अस्मिन् कार्ये तस्य इन्द्रद्युम्नस्य सहायं कृतवन्तः। राज्ञः इन्द्रद्युम्नस्य अनुग्रहं कर्त्तुं सः भगवान् दारुमयरूपेण देहं स्वीकृत्य पुनः अवस्थितो भविष्यति। भगवान् दुराराध्यः भूत्वा अपि यागानुष्ठानमाध्यमेन प्रीतो निश्चयेन भवति। अतः विनयेन सर्वे मिलित्वा अश्वमेधयागः क्रियते चेत् भगवतः सान्निध्यं भविष्यति। देवगणाः सर्वे आन्तरिकयत्नेन सन्तुष्टाः सन्तः यथाविधि सहस्रोपचारैः यज्ञं सम्पादयामासुः। सभागृहं प्रति समागतेभ्यः सर्वेभ्यः ब्राह्मणेभ्यः वस्त्रालङ्कारैः विभूषितं कृत्वा अग्निहोतृभिः सह अभीष्टदेवस्य वैकुण्ठनाथस्य अग्रे संस्थापनं पूर्वकं शुभलग्नं प्रति इन्द्रद्युम्नः प्रतीक्षमानो बभूव। देवानां पूजाविधानं कृत्वा पितृदेवेभ्यः नान्दिश्राद्धं ददौ। स्वस्तिवाचनस्योपयुक्तसमयप्राप्ते राजा माङ्गल्यवेशं धृत्वा ब्राह्मणैः सह राजा विविधानाम् ऋत्विजां वरणं कारयामास। ततः सर्वे ऋत्विजः सत्यव्रतस्य दृढ़सङ्कल्पितस्य राज्ञः इन्द्रद्युम्नस्य दीक्षादिसंस्कारं कृत्वा वेद्याः उपरिभागे आहवनीयाग्नौ हवनं प्रक्षेपणं अनुमन्त्रणं तथा अनुज्ञापनं कर्तुं प्रेरयामास। तेषां ब्राह्मणानामाज्ञानुसारं सः इन्द्रद्युम्नः विधिवत् सर्वानुष्ठानं कृत्वा यजनं चकार। तत्र राजा वाक्यसंयमनपूर्वकं सभामध्ये उपविश्य संयमनपूर्वकं ररौवचर्मासने उपविश्य मृत्युञ्जयतुल्यमशोभत। राजा निमन्त्रितानामतिथिदेवानां भोजनं निमित्तं सर्वान् परिचायकान् इङ्गितं कृतवान्। ततः राज्ञः अनुमतिं स्वीकृत्य सर्वेभ्यः भोजनं ददौ। ऋषीणां तथा ब्राह्मणानां भोजननिमित्तं सुवर्णपात्राणां, क्षत्रियतथावैश्यनिमित्तं रौप्यपात्राणां, शूद्राणां भोजननिमित्तं कांस्यपात्राणां व्यवहारः आसीत्। सर्वे भोजनानन्तरं सर्वं कदलीपत्रमिव उच्छिष्टं कृत्वा परित्यागं कृतवन्तः। तस्मिन् यज्ञस्थले ये ये निमन्त्रिताः आसन् तेषां पुत्रपौत्रादयः अपि समादृताः सन्तः भोजनं चक्रुः। तत्र सर्वे कुटुम्ववत् यज्ञे सहभागिनः आसन्। सर्वेषु देशेषु ब्राह्मणाः प्रजाः मन्त्रिणः सर्वेऽपि समागताः आसन्, परन्तु तेषां समेषां तत्त्वावधानं तस्य देशस्य नरपतिः एव कुर्वन् आसीत्। परन्तु राज्ञः इन्द्रद्युम्नस्य तत्त्वावधानेन नारदः सर्वेषां नृपाणां तत्त्वावधानं चकार। राज्ञः इन्द्रद्युम्नस्य सभास्थले यानि द्रव्याणि आसन् तानि सर्वाणि देवानां कृते अपि दुर्लभानि भवन्ति। राजा इन्द्रद्युम्नः तथा देवराजेन्द्रस्य कोऽपि पार्थक्यः न विद्यते। केवलं देवराजः स्वर्गे तिष्ठति, राजा मर्त्ये तिष्ठति स्म। राजा गन्धमाल्यकस्तुर्यादि द्रव्याणि लेपनपूर्वकं सूक्ष्मवसनं परिधृत्य उपाधानपूर्वकं रत्नपलङ्के दण्डचामरयुक्तेन गीतेन द्विगुणितरूपेण संसारे विचचार। स्वर्गलोके ये पदार्थाः अपि दुर्लभाः आसन् ते च मर्त्यलोके सुलभाः आसन्। एकत्र एतादृशं अद्भुतम् उपचारं दुर्लभमेव। पातालवासिनः अपि सर्वे सुमधुरभोजनं

कृत्वा अत्र विचरणं चक्रुः। एतादृशरूपेण विविधानि कर्माणि अनुष्ठानं कृत्वा सः नरपतिः राजा इन्द्रद्युम्नः अग्न्याधानादारभ्य अवभृथस्नानं यावत् सर्वाणि कर्माणि कृतवान्। अनेन प्रकारेण सः राजा एकोनसहस्रं हेयमेधयागस्य अनुष्ठानं चकार। एवं प्रकारेण राजा इन्द्रद्युम्नः यज्ञविध्यनुसारं यथोचिचाचरणं कृतवान्।

**बोधप्रश्नः**

१. यज्ञे केषां वरणमभूत्?

२. हेयस्य अपरं नाम किम् विद्यते?

## स्वप्ने भगवद्दर्शनम्

यदा अन्तिमयज्ञस्य प्रारम्भः सञ्जातः तदानीं राज्ञः क्रमशः दिव्यगतिम् अभूत्। यस्मिन् दिने यज्ञस्य परिसमाप्तिर्भविष्यति ततः प्राक् सप्तमदिने पूर्वस्यां रात्रौ सः राजा ध्यानयोगेन स्वभाग्यवशतः अव्ययविष्णुमूर्त्तिं ददर्श। पुनः स्वप्ने श्वेतद्वीपस्य चतुर्पार्श्वे क्षीरसागरमपि ददर्श। तत्र कल्पद्रुमः सकलपुष्पद्वारा दिगदिगन्तं यावत् प्रस्फुटितो भूत्वा सुगन्धं विस्तारयति। अस्य द्वीपस्य मध्यभागे दिव्यमणिविनिर्मितं सर्वोत्कृष्टं मण्डपं विद्यते। पुनः तत्र रत्नसिंहासनं समुज्ज्वलितं भवति। तस्य मध्यभागे सिंहासनोपरि दिव्यशङ्खचक्रगदाधरः श्रीहरिः तिष्ठति। अनन्तदेवः तस्य भगवतः दक्षिणपार्श्वे आसीत्। शुभलक्षणा लक्ष्मीः वामभागे तथा पितामहः ब्रह्मा कृताञ्जलिपूर्वकं भगवतः अग्रभागे उपविशति। सनकसनन्दादयः सर्वे भगवतः गुणगानं तथा स्तवं कुर्वन्ति। स्वप्ने भगवतः एतादृशं रूपं दृष्ट्वा सः राजा अतीव प्रसन्नो बभूव। ततः भगवतः वैकुण्ठनाथस्य दर्शनं कृत्वा सः ध्यानस्थो भूत्वा तुष्टाव। ततः मध्याह्नस्य उदिते सूर्ये यथा तमः नश्यति तथैव स्वप्नावस्थातः यदा जाग्रदावस्थां प्रति सः राजा आजगाम तदानीं चैतन्यं प्राप्तवान्। स्वप्नस्य परिशेषे राजा आत्मना परमात्मनः दर्शनं चकार। ततः राज्ञः सहस्राश्वमेधयागः पूर्णतां गतः। कदा एषः नारायणः मम पुरतः विद्यमानो भविष्यति इति विचिन्त्य सः नारदस्य पुरतो गत्वा सर्वं श्रावयामास। ततः भगवान् नारदः तं राजानम् अनुग्रहं कृत्वा यज्ञस्य परिसमाप्त्यनन्तरं भगवतः दर्शनं साक्षात् भविष्यति इति जुघोष।

बोधप्रश्न:

१. कदा भगवान् स्वप्ने भगवत: दर्शनं चकार ?

२. कस्मिन् द्वीपे भगवान् लक्ष्म्या सह निवसति ?

## अक्षयवटोत्पत्तिविवरणम्

यज्ञस्य परिसमाप्त्यनन्तरं स: राजा अवभृथस्नानानन्तरं उद्योगं कृतवान्। सर्वेषां जनानामेकत्र सन्निवेशे तत् यज्ञस्थलं गृहमिव प्रतीयमानं आसीत्। सर्वेषां ऋत्विजां मुखात् उदात्तादिस्वरै: वेदमन्त्रा: शब्दसमूहेन त्रिलोके तिरोहिता: अभूवन्। यज्ञस्थलं नर्त्तकस्तुत्यादिभि: सर्वं पाठकानां कल्पतरो: स्वरूपभतमभवत्। दक्षिणसागरतटे विल्वेश्वरस्य सविधे अवभृथस्नाननिमित्तं ये सेवका: नियुक्ता: आसन् ते कृताञ्जलिपुर:सरं विचित्रं वृक्षं दृष्ट्वा निवेदयामासु:। ते सर्वे सेवका: राजानं प्रति प्रोचु: यत् समुद्रे तटे कश्चित् महावृक्ष: परिदृश्यते। अस्य वृक्षस्य अग्रभाग: समुद्रमध्ये प्रविष्टो भवति, मूलदेश: जलतरङ्गै: प्लावितो भवति। उक्तमहावृक्षस्य वर्ण: रक्तवर्ण:, तथा शङ्खचक्रादिचिह्नेन वृक्ष: चिह्नितो विद्यते। स्वकीयसूर्यसदृशतेजसा सह चतुर्दिगम् आलोकितं कृत्वा स्वकीयेन सुगन्धेन सर्वान् मोहयति। अयं वृक्ष: न कश्चित् साधारण: कदाचित् कश्चित् देव: साक्षात् वृक्षरूपं धृत्वा तस्मिन् समुद्रे प्लवते, तथा प्रतीयमानो भवति। नारदं प्रति राजा अपि तादृशं वचनमवोचत्। परन्तु नारद: तस्मात् निवृत्तो भूत्वा आदौ यज्ञसंपादनार्थं प्रेरयामास। पुन: नारद: तं राजानं प्रोवाच यत् स्वप्ने भवता भगवत: यत् रूपं दृष्टं तस्य भगवत: रोमस्खलितो भूत्वा तरुरूपी वृक्ष: अभूत्। स: वृक्ष: अत्यन्ताद्भुतो भवति। सर्वे ब्रह्मरूपी तस्य तरो: दर्शनं कृत्वा विमुक्तपापा: भूत्वा स्वजन्मन: सार्थकतामलभन्त । स्वप्ने राजा यथा भगवत: जगन्नाथस्य विग्रहं दृष्टवान् तस्मिन् वृक्षे अपि तथा ददर्श। सर्वे विविधोपायेन तरो: पार्श्वे स्थित्वा मृदङ्गशङ्खादीनां नादं कृतवन्त:। तरो: एतादृशं दर्शनं कृत्वा स: राजा केन प्रकारेण अस्य भगवत: मूर्त्ति: भविष्यति इति पप्रच्छ। तत: भगवत: अनन्तमायाया: स्वरूपं प्रतिपाद्य अस्मिन् विषये न कश्चित् व्यक्तिविशेष: अवगन्तुं शक्नोति इति प्रोवाच। एतस्मिन् समये आकाशमार्गात् देववाणी आगता बभूव। पुरुषोत्तम: भगवान् साक्षात् स्वमायाद्वारा अस्य निर्माणकार्यं करिष्यति। आकाशात् अयं शब्द: अपि आगत: यत् न कश्चित् पञ्चदशदिनं यावत् वेदीगृहं प्रति यथा

गच्छेत्। शस्त्रपाणियुक्तः कश्चित् बृद्धः तत्र आसीत्। तं दर्शयित्वा गृहमध्ये प्रवेशं च कारयित्वा यत्नेन गृहं वध्नन्तु इति सर्वे श्रुतवन्तः। यावत् पर्यन्तं निर्माणं कार्यं सम्पन्नं न भविष्यति तावत् पर्यन्तं बहिर्भागे नानविधप्रकारेण वाद्यवादनं कुरुत। यथा अस्मिन् निर्माणकार्ये न केनचित् कोऽपि शब्दः श्रोतुं शक्यते, यदि कश्चित् श्रोष्यति तर्हि तस्य जन्मन्तरे अपि अन्धत्ववधिरत्वं च आगच्छति। गृहस्य अन्तः अपि न कश्चित् यथा प्रवेष्टुं शक्नोति। यदि कश्चित् अन्यः अस्य दर्शनं करिष्यति तर्हि तस्य विनाशः निश्चितो भवति। नारदादयः सर्वे आकाशमार्गात् एतादृशं वचनं श्रृत्वा तदनुसारं कार्यसम्पादनं चक्रु। ततः सः बृद्धः राजानं प्रति प्रोवाच, स्वप्ने भवान् यथारूपं दृष्टवान् तथैव रूपं कल्पयित्वा निर्माणं भविष्यति। साक्षात् पुरुषोत्तमः नारायणः एतादृशं वाक्यं कथयित्वा अन्तःपुरं प्रति जगाम।

**बोधप्रश्नः**

१. के समुद्रे वृक्षं दृष्टवन्तः ?

२. कस्मात् देववाणी आगता आसीत् ?

## भगवतः विष्णोर्दारुमयमूर्त्याविर्भावः

सर्वे इन्द्रद्युम्नस्य आदेशानुसारं प्रतिमानिर्माणगृहस्य आवद्धं कृत्वा वाग्देव्याः उपदिष्टस्य कर्त्तव्यस्य परिपालनं चक्रुः। अनेन प्रकारेण कतिपयदिनानन्तरं दिव्यगन्धैः अद्भुतः सुगन्धः सर्वैः अनुभूतः। ततः आकाशमार्गात् पुष्पवर्षणमभवत्। ऐरावतादयः सर्वेऽपि गजाः विविधसुगन्धितं द्रव्यमाघ्राय सुखानुभवं कृतवन्तः। सर्वे भगवतः रूपं दृष्ट्वा अभिभूताः अभूवन्। ततः प्राक् भगवतः आराधनां यथा कृतवन्तः, सर्वे च देवाः दारुरूपेण अपि दर्शनं कृत्वा अर्च्चनादिकं चक्रुः। क्रमशः पञ्चदशदिनानन्तरं भगवान् जगन्नाथः साक्षात् मूर्त्तिरूपेण अवतीर्णो बभूव। भगवान् जगन्नाथवलभद्रसुभद्रासुदर्शनरूपेण शङ्खचक्रगदापद्माद्यायूधैः सह चतुर्धामूर्त्तिं धृत्वा विराजितो अभवत्। अनन्तदेवः सप्तफणाविशिष्टो भूत्वा छत्राकृतिरूपेण तदुपरि विन्यस्तो बभूव। सुभद्रा अपि एकस्मिन् हस्ते वरपद्मस्तथा अन्यस्मिन् हस्ते अभयं दधार। सर्वेषां प्राणिनामाभ्यन्तरे असौ देवः अपि आत्मारूपेण विद्यमानः वर्तते। यदि शरीरात् असौ भगवान् बहिर्गच्छति, सः मृतो भवति।

अनन्तदेवस्य अवतारभूतो भवति वलरामः तथा सुभद्रा शक्तिस्वरूपिणी। सुदर्शनः अपि विष्णोः करकमले शोभते। प्रतिमायां विविधप्रकारकं वस्त्रं परिधानं कारयित्वा वर्णैः रञ्जयामास। भगवतः श्रीजगन्नाथस्य नीलमेघसदृशः श्यामलवस्त्रं भवति, वलरामस्य शुभ्रांशुप्रतिमं धवलवस्त्रं, चक्रराजस्य सुदर्शनस्य रक्तवर्णं सुभद्रायाः कुङ्कुमसदृशः परिधानं कारयामास। एताः प्रतिमाः दारुरूपेण यदि दृष्टाः भवन्ति तर्हि पापं भविष्यति । अतः यत्नेन पट्टनिर्यासेन दृढ़रूपेण आवद्धं कारयित्वा सर्वेषामवयवानामावद्धं कृत्वा गोपयेत्। यदि कश्चित् जनः गात्रलेपम् अपनीतं कृत्वा दर्शनं करोति सः चिरकालं यावत् नरके वसति। तस्मिन् राज्ये दुर्भिक्षः तथा पीडा भवति। अतः कदाचित् अपि आवरणं विना दर्शनं न कर्त्तव्यम्। मानवाः अस्यामवस्थायां दर्शनकृते सति महाभयं प्राप्नुवन्ति। परन्तु अङ्गवस्त्रादिषु सज्जितो भूत्वा दर्शनेन कोटिकलेवरं लभ्यते। ततः एतस्य देवस्य वायुकोणे एकशतहस्तदूरे यत् नृसिंहदेवस्य स्थानं विद्यते, तस्य उत्तरभागे यत् प्रशस्तं विस्तीर्ण्णं स्थानं विद्यते तत्र सुदृढ़प्रासादं राजा निर्मितवान् । विद्यापतिः अपि भगवतः नीलमाधवस्य दर्शनं लब्धवान्। अस्मिन् नीलपर्वते विश्वावसुः प्रागेव भगवतः नीलमाधवस्य अर्च्चनां नित्यमकरोत्। अतः तयोः द्वयोः वंशद्भोवान् सर्वान् प्रतिमायाः लेपसंस्कारकार्ये सदा नियोजयेत्। सर्वे रत्नसिंहासनस्य उपरिभागे जगन्नाथवलभद्रसुभद्रासुदर्शनरूपेण चतुर्धा मूर्त्तिं ददृशुः। भगवतः मुखमण्डलं इषत् हास्यरूपं तथा वक्षस्थलं उन्नतम् आसीत्। दीनानामुद्धारणनिमित्तं तस्य अवतारः विद्यते। जगन्नाथस्य द्वे नयने श्वेतपद्मस्य शोभामहरताम्। अस्य भगवतः शोभा नीलमेघसदृशी आसीत्। श्रीवलदेवस्य मुखपद्मः अट्टहासेन पूर्णः तथा तस्य वक्षस्थलं कोमलं तथा उन्नतमासीत्। देहस्य अपरभागः कुण्डलीकृतो विद्यते। सः हलमूषलचक्रपद्मादीनां धारणं कृत्वा अतिष्ठत्। हारकुण्डलकेयूरकिरीटमुकुटालङ्कारैः देहस्य शोभा समुज्ज्वलितो भवति। अनयोः मध्ये सुभद्रा विराजते। अस्याः मुखमण्डलं विकशितपद्मसदृशम् आसीत्। सा विष्णोः वामपार्श्वे शाखाग्रनिर्मित्तं नवोदितसूर्येण तुल्यं तेजोमयी आसीत्। सर्वे एतादृशं रूपं दृष्ट्वा मुग्धाः अभूवन्।

जगतः नाथः जगन्नाथः नित्यं भक्तानां हृदये विराजते। योगिनः ध्यानवलेन एतस्य दर्शनं नित्यं कुर्वन्ति, स एव परमात्मा परात्परः नारायणः। सः श्रीहरिः सकलज्ञानस्य सागरः विद्यते। यस्य दर्शनेन कोटिजन्मार्जितस्य पापास्य विनाशो भवति।

**बोधप्रश्नः**

१. जगन्नाथस्य मुखमण्डलं कीदृशमासीत्?

२. वलरामस्य आभा कीदृशी?

## इन्द्रद्युम्नसरोवरोत्पत्तिविवरणम्

नारदेन सह सर्वे च देवगणाः भगवतः एतादृशं रूपं दृष्ट्वा मुग्धाः अभूवन्। तस्य स्वरूपस्य दर्शनं कृत्वा सर्वे आनन्देन स्तुतिं चक्रुः। इन्द्रद्युम्नः प्रोवाच हे भगवन्! पूर्वजन्मनि भगवतः आराधनां न कृत्वा अस्मिन् जन्मनि दीननिदारूणदुर्विपाकादिभयेन भीतो भवामि। ब्रह्माशम्भुवरुणेन्द्रादयः सर्वे देवाः यस्य दर्शनं प्राप्तुं न शक्नुवन्ति तस्य भगवतः दर्शनं मम कृते कथं सम्भवति? जगन्नाथस्य दारुमयमूर्त्तिं दृष्ट्वा सकलानां पापानां विनाशः अभूत्। विषयेषु आकृष्टो भूत्वा अपि भगवतः ध्यानं कश्चित् करिष्यति तर्हि सोऽपि परमपदं प्राप्स्यति। अस्मिन् संसारे नरः विविधावस्थायां भ्रमणं करोति। अनेन प्रकारेण भगवतः जगन्नाथस्य पुरतः इन्द्रद्युम्नः विविधप्रकारेण स्तुतिं कृत्वा तोषयामास। अन्ये च ये सर्वे ब्राह्मणाः विद्वांसः क्षत्रियाः वैश्याः मुनियः आसन् ते सर्वेऽपि पुराणोक्तस्तवमाध्यमेन भगवतः स्तुतिं कृतवन्तः। ततः नारदस्य आज्ञानुसारम् इन्द्रद्युम्नः पौरहितान् नियोजनं कृत्वा भगवतः पूजाविधानं कथयामास। ॐ नमो भगवते वासुदेवाय इति द्वादशाक्षरेण मन्त्रेण भगवतः वलरामस्य पूजार्च्चना क्रियते। वेदोक्तेन पुरुषसूक्तेन भगवतः नारयणस्य पूजाविधानं विहितं भवति। भगवत्याः सुभद्रायाः देवीसूक्तेन तथा सुदर्शनस्य सौदर्शनीसूक्तमाध्यमेन उपासना क्रियते। राजा स्वसमृद्ध्यनुसारं भगवतः पूजार्च्चनां कृत्वा सर्वेभ्यः समागतेभ्यः ब्राह्मणेभ्यः दानं कृतवान्।

अश्वमेधयज्ञस्य अङ्गभूतं गोदानं प्रसिद्धमासीत्। दानसमये गवां खुराग्रखाते जलं पतित्वा तदपि एकं तीर्थस्थानमभूत्। तस्मिन् तीर्थे पितृदेवान् तर्पयित्वा सर्वे महत् फलं प्राप्नुवन्ति। इदं तीर्थस्थानं इन्द्रद्युम्ननरपतेः नाम्ना प्रसिद्धं जातम्। मानवाः तस्मिन् सरोवरकूले पितृभ्यः पिण्डदाने कृते सति एकविंशतिपुरुषाणामुद्धारं भवति। तस्मादधिकं तीर्थं स्थानं न विद्यते। इन्द्रद्युम्नसरोवरेण सह गङ्गा एव तुल्यं भवति। महाप्रलयकाले अपि वसुधादेवीं स्मरणं कृत्वा तस्य स्थानस्य सुरक्षार्थं याचनां चकार। तत्र दीनानां कृते अनाथानां कृते

स्वाभिलषितवस्तूनि दत्वा तोषयामास: असौ इन्द्रद्युम्न:। तत: स: नृप: प्रस्तरखण्डानां च्छेदननिमित्तं बहुव्ययमकरोत्। इदं पुरुषोत्तमक्षेत्रं भगवत: प्राणस्वरूपं विद्यते। अस्मिन् स्थाने दानतपव्रतादीनां महत् फलं भवति। अत्रैव प्रत्यक्षरूपेण भगवत: दर्शनं कृत्वा धर्मार्थकाममोक्षाख्यं चतुर्विधं फलं सर्वै: लभ्यते।

| |
|---|
| बोधप्रश्न:<br>१. गोदानं कस्य अङ्गभूतमासीत्?<br><br>२. सरस: नाम किम् आसीत्? |

## प्रासादनिर्माणम्

इन्द्रद्युम्न: भगवत: दर्शनं तथा अनुग्रहं लब्ध्वा प्रसन्नमनसो भूत्वा विचचार। कश्चित् ब्राह्मण: तं राजानं प्रति आह्लादेन भगवत: स्वरूपं कथयामास। दुराराध्यस्य भगवत: जगन्नाथस्य उपासनायां अत्यन्तं दुर्लभं मोक्षतत्त्वं लभ्यते इति नास्ति कश्चिदपि सन्देह:। भगवत: अवतारा: वेदोक्ता: अपि वर्तन्ते।

भारतवर्षे उत्कलप्रदेशे जनानां मुक्ति: अनिर्वार्यं भविष्यति। भगवत: जगन्नाथस्य दर्शनं कृत्वा को वा मुक्तिपथं प्रति न यास्यति। अत: अस्मिन् स्थाने इन्द्रद्युम्नस्य अवस्थानं नितान्तं भवति। अत्र स्थित्वा भगवत: नित्याराधनां कृत्वा दानधर्मादीनामाचरणं कुरु इति स: ब्राह्मणश्रेष्ठ: प्रोवाच। तस्य वचनं श्रृत्वा देवर्षि: नारद: तस्य यथार्थतां कथयामास। नारद: अपि तत्र स्थातुं तथा सुन्दराणि भवनानि निर्मातुं प्रेरयामास। तत्रापि नरसिंहस्य स्थापनां कृत्वा आरधयितुं प्रोवाच। तत: नारदवाक्येन सन्तुष्ट: स: राजा प्रस्तरखण्डै: देवगृहं निर्माय सर्वेषां सत्कारार्थं धनव्ययं कृतवान्। क्रमश: सुन्दरप्रासादस्य निर्माणमभूत्। तस्मिन् समये भारतवर्षे ये राजान: आसन् ते सर्वेऽपि अत्र योगदानं चक्रु:। बह्वर्थं व्ययीकृत्य स: राजा प्रासादस्य निर्माणं कृतवान् यस्य प्रासादस्य शीर्षभाग: कलयितुं न शक्यते। बहव: जना: अस्मिन् कार्ये नियोजिता: अभूवन्। अस्य प्रासादस्य प्रत्येकमपि कोण: सुवर्णनिर्मित्त: आसीत्। प्रासाद: शरत्कालीनचन्द्रमा सदृश: बभूव। तत: अस्य प्रासादस्य गर्भगृहस्य निर्माणं अतीवयत्नेन कृतवन्त:। प्रासादस्य उपरिभागे व्रजपातादिभयं निराकर्तुं शिल्पशास्त्रानुसारं विविधानां मणिमयानां

संयोजनमभूत्। भगवतः प्रासादः त्रिलोकदुर्लभः अभूत्। पृथिव्यां कुत्रचिदपि एतादृशः प्रासादः न निर्मितः आसीत्। ब्रह्मा एव अस्य निर्माणे कार्यभारं स्वीकृतवान्।

एवं रूपेण नारदेन सह मिलित्वा इन्द्रद्युम्नः ब्रह्मणः आदेशानुसारम् अस्य प्रासादस्य निर्माणं यत्नेन कृतवान्। अयं प्रासादः चिरकालं यावत् तिष्ठति। ततः देवर्षिः नारदः इन्द्रद्युम्नं बहु अभ्यर्थनां कृत्वा स्वलोकं प्रति अव्रजत्।

बोधप्रश्नः

१. प्रासादस्य निर्माणं कः अकरोत्?

२. दारुभूतमुरारि कः आसीत्?

## सारांश:

अस्य अध्यायस्य महत् वैशिष्ट्यं भजते। अस्मिन् अध्याये राजा इन्द्रद्युम्नः सहस्राश्वमेधयागनिमित्तं प्रस्तुतिं कारितवान्। तत्र विविधान् नृपान् देवान् ऋषीन् ब्राह्मणान् अनुचरान् वेदज्ञपण्डितान् निमन्त्रणं कृतवान्। अस्य यज्ञस्य अयोजनं विधिवत् ब्राह्मणैः वेदपतिभिः सार्द्धं मिलित्वा साफल्यं कृतवान्। ततः रात्रौ भगवतः दर्शनं राजा स्वप्नावस्थायां कृत्वा मनसि असीमानन्दम् अलभत। ततः विविधप्रकारेण भगवतः परितोषाय अस्तुवत्। परन्तु स्वप्नानन्तरं भगवतः दर्शनं न प्राप्तवान्। परिशेषेण भगवतः दर्शनमवश्यं भविष्यति इति मनसि चिन्तयन् स्वकर्मणि प्रवृत्तो बभूव। अक्षयवटवृक्षस्य दर्शनमस्य च अध्यायस्य महन्महत्त्वं प्रतिपादयति। अस्य वृक्षस्य प्राप्त्यनन्तरं सर्वे मिलित्वा यदा वितर्कं कुर्वन्तः आसन् तदानीं देववाणी आगता आसीत्। ततः तदनुसारं वृक्षं स्वीकृत्य सर्वे तस्मै बृद्धाय ददौ। नारायणरूपी सः बृद्धः भगवतः रूपं कल्पयामास। यद्रूपं राजा स्वप्ने भगवतः दर्शनं कृतवान् तस्मिन् रूपे एव अस्याः प्रतिमायाः निर्माणं कृतवान्।

# आदर्शप्रश्नाः

## लघुत्तरीयप्रश्नाः

१. भगवतः रूपवर्णनम्।

२. आकाशात् श्रुतः सम्वाद।

३. अक्षयवटस्य माहात्म्यम्।

## विश्लेषणात्मकप्रश्नाः

१. अश्वमेधयज्ञे भोजनस्य वर्णनं कुरुत।

२. स्वप्ने भगवतः जगन्नाथस्य दर्शनं विवेचयत।

३. अश्वमेधयागस्य व्यवस्थां प्रतिपादयत।

## निवन्धात्मकप्रश्नाः

१. यज्ञस्य प्राक् प्रस्तुतिं वर्णयत।

२. राज्ञः सहस्राश्वमेधयज्ञानां वर्णनं कुरुत।

३. अक्षयवटवृक्षस्य विषये आलोचयत।

## एकाङ्कप्रश्नाः

१. विशालः वृक्षः कुत्र आसीत्?

२. कः विष्णोः प्रतिमां निर्मास्यति?

३. सहस्राश्वमेधस्य कः अनुष्ठानमकरोत्?

४. राजा इन्द्रद्युम्नः स्वप्ने कस्मिन् द्वीपे भगवन्तं ददर्श?

५. ब्राह्मणानां कृते भोजनार्थं कीदृशानि पात्राणि आसन्?

६. वेद्याः निर्माणं कुत्र अभूत्?

७. रत्नसिंहासने कः विराजमानो बभूव?

८. शूद्रणां कृते कीदृशानि पात्राणि अभूवन्?

९. केषां यज्ञे वरणमभूत्?

१०. सर्वेषां नृपानां तत्त्वावधानं क: अकरोत्?

११. नीलकण्ठस्य कस्यां दिशि सभास्थली आसीत्?

१२. क: महेन्द्रस्य समीपं गत्वा निवेदयामास?

**उत्तराणि**

१. समुद्रे २. बृद्धः ३. इन्द्रद्युम्नः ४. श्वेतदीपे ५. सुवर्णानि ६. नृसिंहस्य अग्रे

७. इन्द्रद्युम्नः ८. कांस्यपात्राणि ९. ऋत्विजां १०. नारदः ११. पश्चिमस्यां १२. इन्द्रद्युम्नः